४०६.६ ३९२

प्रत्यभिज्ञा वृत्ती
ईश्वर प्रत्यभिज्ञा
विवृती ४८ ४९
नं॰ २५४ जिल्द १

ॐ. प्र भि. वृ. १

ॐ नमो महामाहेश्वराय ॐ नमः शिवाय सुशिवाय शिवदाय नमो नमः ॐ क-
थञ्चिदासाद्य महेश्वरस्य दास्यं जनस्याप्युपकारमिच्छन् समस्तसम्पत्सम-
वाप्तिहेतुं तत्प्रत्यभिज्ञामुपपादयामि १ कथंचिदिति वृत्तिः परमेश्वरप्रसा-
दादेव लब्धात्यन्तदुर्लभतद्दास्य लक्ष्मीरहमेकाकिं सम्पदा लज्जमानो ज-
नसमीपमविलोक्य स्वस्वामिने वक्ष्यमाणोपायेन प्रत्यभिज्ञापयामि येन त-
स्यापि परमार्थलाभेन परितुष्येयम् १ ॐ कर्त्तरि ज्ञातरि स्वात्मन्यादिसिद्धे
महेश्वरे अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः २ कर्त्तरीति वृत्तिः सर्वेषां
स्वात्मनः सर्वार्थसिद्धिसमाश्रयस्य तत एव सर्वार्थसाधनानामन्यथानुपपत्त्या क्रोडी-
कृतसिद्धेः स्वप्रकाशस्य प्रमात्रेकवपुषः पूर्वसिद्धस्य प्रमाणस्य ज्ञाने क्रिया च स्व-
संवेदनसिद्धमैश्वर्यं तेनेश्वरस्य सिद्धौ निराकरणे वा जडानामेवोद्यमः २॥
ॐ ॐ किन्तु मोहवशादस्मिन् दृष्टेऽप्यनुपलक्षिते शक्त्याविष्करणेनेयं प्रत्यभिज्ञो-
पदर्श्यते ३ किन्त्विति वृत्तिः केवलमस्य स्वसंवेदनसिद्धस्येश्वरस्य मायाव्यामो-
हादहृदयङ्गमत्वादस्मायायाः प्रभावाभिज्ञाने ख्यापनेन दृढनिश्चयरूपं प्रत्य-
भिज्ञानमात्रमुपदर्श्यते ३ ॐ तथा हि जडभूतानां प्रतिष्ठा जीवदाश्रया ज्ञानं क्रि-
या च भूतानां जीवतां जीवनं मतम् ४ तथा हीत्यत्र वृत्तिः वस्तूनां जडाजडभे-
३४ दे नैविध्ये तत्र जडस्वरूपस्य जीवन्निष्ठा सिद्धिः जीवतां पुनर्जीवनं जीवत्वं ज्ञानक्रि-
ये एव ४ ॐ तत्र ज्ञानं स्वतःसिद्धं क्रिया कायाश्रिता सती परैरप्युपलक्ष्यते तया
ऽन्यज्ञानमूह्यते ५॥ तत्रापि प्रत्यक्षात्ज्ञानमात्मसंवेद्यं परत्रापि क्रिययैव प्र-
सिध्यतीति सिद्ध एव स्वसंवेदनसिद्धतया स्वपरयोरीश्वरो हृदयस्थ आत्मा तस्य
मायाशक्त्या निसर्गतिरोधानादेव विमतिः उपोद्घातः ॥ ५ ॐ ननु स्वलक्षणा-
भासं ज्ञानमेकं परं पुनः साभिलापं विकल्पाख्यं बहुधा नापि तद्द्वयम् ६॥ ॐ नि-
त्यस्य कस्यचिद्द्रष्टुस्तस्यात्रानवभासतः अहंप्रतीतिरप्येषा शरीराद्यवसायिनी ६
ज्ञानमेकं स्फुटावभासं स्वलक्षणानुभवरूपं निर्विकल्पकं तत्कथ्यते अपरं
तु शब्दार्थघटनायां स्मृतिसंशयोत्प्रेक्षादिबहुभेदं विकल्पसंज्ञकं उभयमप्येतत्पु-
ज्यते बोधरूपज्ञानातिरिक्तस्यात्मनः सम्बन्धितया न तस्यानुपलब्धेः कोऽसौ स्थिर आ-
त्मा साभिलापाहंप्रत्ययेनापि शरीरादिकवेद्यवस्तुनोऽर्थान् वेदयिता कश्चिल्लोके
व्यवसीयते ६ ॥ ॐ अथानुभवविध्वंसे स्मृतिस्तदनुरोधिनी कथं भवेन्न नित्यः स्यादा-
त्मा यद्यनुभावकः ७ स्मृतिकाले पूर्वानुभवनाशात्कथं पूर्वानुभवावष्टम्भधर्मा
स्मृतिर्जायेत यदि तदापि तदनुभवे बोधेऽनन्वयिनि यद्यनेककालस्थायी बोधः
स एवात्मानुभविता ७ ॐ सत्यमप्यात्मनि दृङ्नाशान्न हि भाति दृष्टवस्तुषु स्मृतिः केन ॥१०॥
अर्थाभासनाशात्तु न्यायालम्बनीयो विषयापर्थो नास्ति स्मृतिरेकबोधात्म

ॐ

निमत्त्वप्रत्यभिज्ञानविषयैवेतिव्यवहारोच्छेदः अस्मतोर्धानुभवस्यविष
येणास्मा विषयवतीयदि अस्यथैवानुभवत्तयैवस्मायते हि पूर्वानुभवसं
सं स्कारात्स्मृतिसंभवः यथैवमंतर्गडुनाकोर्थः स्यात्स्याय्येनात्मना अनुभवा
त्संस्कारः संस्काराच्चस्मृतिर्जायमाना तत्पूर्वानुभवमनुकुर्वतीअवगाहित
विषयंतमनुभवमाभासयत्येवमात्मस्थैर्येणाकिमनुपयोगिना संस्कारस्या
त्मवादेयंगीकारणात्तेनैवचसिद्धेः ९ ॐ ततोभिन्नश्चधर्मश्चतत्स्वरूपाविशे
षतः संस्कारात्स्मृतिसिद्धौ स्यात्ती दृष्टैवकल्पिताः १० स्मृत्वर्थः स्वज्ञाना सं
दिभिन्नधर्माश्रयत्वेनाप्यात्मनोनोपयोगाभिन्नैर्धर्मैरसंभिन्नस्यानुपजातवि
शेषस्यस्मृतावव्याप्तेः तद्रूपत्वकल्पनामात्रमेतदात्मासन्नेति ९ ॐ ज्ञा
नेचचित्स्वरूपंचेत्तदतिर्यक्किमात्मवत् अथापिजडमेतत्स्यकथमर्थप्रका।
शता ११ चित्स्वभावेज्ञानस्यचेतयधर्मेदेशकालावेशायोगादात्मनइव।
नित्यतादिप्रसंगः जडत्वेकथमर्थस्यासौप्रकाशः ११ ॐ अथार्थस्ययथा
रूपंधत्तेबुद्धिस्तथात्मनः चैतन्यमजडंसैवंजाडेनार्थप्रकाशता १२ ॥ ज्ञाने
बुद्धिस्साजडापि यथाविषयरूपच्छायांधत्तेतथात्मनोपिचैतन्यच्छायामतो
धा स्यावंप्रकाशः तथाचतस्याश्चित्स्वरूपतासात् एवंज्ञानेमदपिनात्मसम्ब
पितयानुपपत्तेः क्रियात्मस्वरूपाण्यालिनान्यसम्बन्धितया १२ ॐ क्रिया
र्य प्यत्र स्यकायादेस्तत्तद्देशादिजातता नान्यादृष्टेः नसाप्येकाक्रमिकेकस्यचो।
दिता १३ क्रियापिस्वर्वापरीभूतावयवैकाकारकव्यापाररूपानयुक्ता क्रमिक
स्यानेककालस्पर्शः स्वात्मैक्यायोगात् नापिकालक्रमव्यापीचैकस्वभावस्य
तस्याआश्रयायुक्तः केवलेगमनपरिणामादिरूपासाक्रिया कायादीनांतत्तद्भि
न्नदेशकालगतायैवसत्तामात्रमेतदतिरिक्तस्यान्यस्यानुपलम्भात् १३ ॐ त
त्रतत्रस्थितेतत्तद्वतीत्येवदृश्यते नान्यत्तत्र्यास्तिसम्बंधः कार्यकारणभाव
तः १४ पूर्वस्मिन्नतिपरस्य सत्तेत्येतावन्मात्रेनुभवः क्रियावश्चतक्रियाकार
कादिसम्बन्धः कश्चित् भिन्नस्याप्यनुपलम्भात् कार्यकारणभावाहतेनान्य।
दृष्टत्वात्तातेयमिति १४ ॐ द्विष्ठस्यानेकरूपत्वात्सिद्धस्यानपेक्षणात् पार
तंत्र्याद्ययोगाच्चतेनकर्तापिकल्पितः १५ सम्बन्धोद्विष्ठो नैवकेनात्मनोभय द्वितीयमाह्निक ।। मू २ ।।
त्रास्थितिमुक्ता नचद्वयोः सिद्धयोरन्योन्यापेक्षेनापस्वात्ममात्रनिष्ठयोः पारतं
त्र्यरूपः सम्बंधः ततोयथात्वाराकल्पितो तथाकर्तृत्वमपीतिकथमात्मासर्वे
श्वरइति १५ ॐ स्मृत्यंकितस्मृतिज्ञानेपूर्वानुभवसंस्कृतेः ज्ञातमप्यात्मनिष्ठं
तत्तायानुभववेदकम् १६ पूर्वानुभवसंस्कारप्रबोधजन्मापिस्मृतिरात्ममात्र
निष्ठतात्स्वरूपसंवेदिकैव नतुपूर्वानुभवावेशाभावात्पूर्वानुभूतार्थव्यवस्था
पिकाघटते १६ ॐ इदन्ताभासैवतान्येतवेद्यारूपदर्शावटक रसंस्कारजत्वे

ॐ प्र० वि० द्वि० २

नैतन्न्याय्यं तेन तत्कृतिः १७ सर्वा हि ज्ञप्तिः स्वसंवेदनैकरूपा नान्यसंवेद्या
रूपस्मृतिज्ञानयोरन्योन्यविषयवेदनमपि स्यात्तत्रेन्द्रियनियमाभावः पूर्वा
नुभवसंस्कारजत्वेन तन्मात्ररूपमात्रे न तु पूर्वानुभवावगतिः तदभावात्तन्मा
त्ररूपमपि नावसेयम् १७ ॐ अथातद्विषयत्वेऽपि स्मृतेर्भिन्नत्वमायतः दृष्टालम्ब
नता भ्रान्त्या तदेतदसमञ्जसम् १८ नचापि भ्रान्त्या पूर्वानुभवेन तद्विषयेण च ।
शुक्तौ रजतमिवासंवेद्यमानमप्यवस्यतीति स्मृतिस्तद्विषया १८ ॐ स्मृति
तैव कथं तावज्ज्ञानेऽस्यार्थस्थितिः कथम् पूर्वानुभवसंस्कारापेक्षा च किमि
तीष्यते १९ पूर्वानुभवप्रकाशात्तद्विषयसंप्रमोषेऽध्यवसायमात्रात्स्मृतित्वे
न युक्तम् न च भ्रान्त्या पूर्वानुभूतार्थव्यवस्थापने पूर्वानुभवस्पर्शे च तद्भिन्न ।
योगक्षेमायाभ्रान्तेः संस्कारजत्वेऽकोग्रहः १९ ॐ भ्रान्तित्वे चावसायस्यानज
डाद्विषयस्थितिः ततो जाड्यान्निजोल्लेखनिष्ठान्नार्थस्थितिस्ततः २० अध्य
वसायापभ्रान्त्या विषयव्यवस्थापकत्वं न तु स्वसंवित् स च जडः कथमर्थ
व्यवस्थायां हेतुः चिद्रूपोऽप्यतीतार्थमाभासयेद्वा स्वात्मोल्लेखमात्रप्रका
शत्वान्न तत्र हेतुः २० ॐ एवमन्योन्यभिन्नानामपरस्परवेदिनाम् ज्ञानानाम् ।
नुसंधानजन्मा नश्येज्जनस्थितिः २१ ज्ञानानि स्वात्ममात्रपरिनिष्ठितानि
स्वसंविद्रूपतया नापरसंवेद्यानि तेषामन्योन्यविषयसंघटनामयः परस्प
र्योपदेशपर्यन्तो लोकव्यवहारः कथम् २१॥ ॐ न चेदन्तःकृतानन्तविश्वरूपो
महेश्वरः स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान् २२ चित्तत्वमेव विश्वरू
पमतोऽतिरिक्तस्यानुपपत्तेः सर्वपदार्थज्ञानानामन्योन्यानुसंधानमस्यैव ।
ज्ञानादिकाः शक्तयः सतः स्मृतिर्ज्ञानमपोहनं चेति ह्युक्तम् २२ ॐ स हि पू
र्वानुभूतार्थोपलब्धा परतोऽपि सन् विमृशन्नेति स्वैरी स्मरतीत्युपदिश्यते २२
पश्चादपि पूर्वानुभूतार्थानुभवितृत्वात्पूर्वानुभूतार्थप्रकाशासंप्रमोषेण
तस्यैकस्य विभोः कर्तुः स इत्यनुपूर्वानुभूततत्त्वेन प्रत्यवमर्शः स्मृतिर्नाम व्यापा
रः २३ ॐ भासयेच्च स्वकाले तत्पूर्वाभासितमामृशन् स्वलक्षणं घटाभास ।
मात्रेणाथाविलात्मना २४ स्मृतिशक्त्या महेशः पूर्वानुभूतस्वलक्षणमप ।
रामृशन्नाभासयत्येवान्यथा प्रकाशितस्य परामर्शोऽनुकृतः स्यात्स्वमते का
ल एव च तेन स्मरणकाले न रूपेणाभासेन दृश्यते कदाचित्तु स्थितावशा
हटकाञ्चनद्रव्यसन्नायनस्मैकाभासरूपेणैवा स्यात्स्फुटावभासोऽन्यदा त
सर्वात्मनार्थिकत्वेन तथैवातिशयस्थिरतरावहितचेतसस्तु दृष्टार्थप्रत्य ।
दीकार एव २४ ॐ न च युक्तं स्मृतेर्भेदे स्मर्यमाणस्य भासनम् तेनैक्यं
भिन्नकालानां संविदां वेदितैष सः २५ पूर्वानुभूतस्यार्थानुभवेन सहत
त्कालिकस्मृतिप्रकाशेऽवभासमानः स्मृत्यभिन्न एव प्रकाशाद्भिन्नस्य प्र ।

प्रकाशमानतानुपपत्तेः एवं चानुभवस्यादिसंविदात्मैकः स एवात्मा वे
दकः तथाहि २५ ॐ नैव स्वानुभवो भाति स्मृतौ पूर्वार्थवत् पृथक् प्रागनु
भूतमहमित्यात्मारोहेणावभासनात् २६ स्मृतौ स्मर्यमाणोऽनुभूतार्थो यथा
पृथगस्तो भाति न तथानुभवः स्वात्मन एवाहंतया प्रमेयस्यानुभवमयते
नप्रथनात् यश्चानेककालोऽहं वेद्यार्थः स एवात्मा २६ ॐ योगिनामपि
भासन्ते न दृश्या दर्शनान्तरे स्वसंविदेकमानत्वात् भान्ति मेयपदेऽपि वा २७ ।
सर्वज्ञानामपि प्रमात्रन्तरगतोपलम्भाः स्वसंविन्मात्रवेद्यस्वभावाः स्वात्मा
रूपेणैवावभासेरन् अतश्चैते योगिना परात्मतापत्त्यैवेत्तत्वम् प्रमेयक
ल्पावामपि घटादिवद्भान्ति स्वैकैकन तु स्वबोधात्मना रूपेणावभासेरन् यदि
तथा न भवेत् २७ ॐ स्मर्यते यच्च गायामीत्येवमित्यपि भेदतः तथाकरणा
मेवाख्यामयादृष्टमिति स्मृतेः २८ मया दृष्टमिति प्रमात्रन्तर्गतदर्शनपरा
मर्शात्मिका या एव स्मृतेर्विभज्य कथनमेतदेवमनुभवोऽसौ ममाभूदिति भे
देनापि निर्देशः २८ ॐ या च पश्याम्यहमिमं घटोऽयमिति वावसा मन्यते सम
वेतस्याप्यवभासनिदर्शनम् २९ पुरःस्थितार्थविकल्पेनापि घटमिमं पश्या
मि घटोऽयमिति वा प्रमात्रमयमेव दर्शनं प्रत्यवमृश्यते २९ ॐ तन्मया दृश्यते
दृष्टोऽयं स इत्यादावर्थस्यापि ग्राह्यग्राहकताभिन्नावर्था भातः प्रमातरि ३० चतुर्थमाह्निकम् ४।
तस्मादृष्टस्य वामर्शस्य सा स्वायां स्मृतौ विकल्पमात्रे वाहष्का दृष्टानुवेद्यं विना
पि स इत्ययमिति वार्थमात्रनिर्देशो सर्वत्रैकप्रमातृलीनावेवानुभावानुभाव
कौ मायाकृतविच्छिन्नावभासावपि प्रकाशेते ३० ॐ वर्तमानावभासानां भ
वानामवभासनम् अन्तःस्थितवतामेव घटते बहिरात्मना ३१ प्रत्यक्षेऽपि
यावदर्थानामभेदेनावभासः प्रमात्रन्तर्लीनानामेव सतो युक्तः ३१ ॐ प्रागि
वार्थोऽप्रकाशः स्यात् प्रकाशात्मतया विना न च प्रकाशो भिन्नः स्यादात्मार्थ
स्य प्रकाशता ३२ प्रमातृसंवित्प्रकाशस्वरूपतां विना यथादौ घटोऽस्यनावभात
स्तथा ज्ञानकालेऽपि स्यात् प्रकाशमानता चार्थस्य प्रकाशः स्वरूपभूतो न
तु भिन्नः ३२ ॐ भिन्ने प्रकाशे चाभिन्ने संकरो विषयस्य तत् प्रकाशात्मा प्रकाशेन
र्थो नाप्रकाशश्च सिध्यति ३३ प्रकाशमात्रे चार्थाभिन्ने सर्वार्थसाधारणे तस्या
घटस्य प्रकाशोऽयमयं घटस्यैवेति विषयनियमो न निर्वहति यतः तस्मादं सि ध्य
द्धिः प्रकाशात्मतया तत्र ३३ ॐ तत्तदाकस्मिकाभासो बाह्यं चेदनुमापयेत्
न त्वभिन्नस्य बोधस्य विचित्राभासहेतुता ३४ जडानामाभासमात्रहेतुतैव
सत्ता सिद्धिः सा चाभासेनैव तत्र बोधमात्रमेकमेवात्रतत्त्वं तस्याविशेषेऽपि
क्रमेणाविविधप्रमाणगोर्णावभासन्ते तेन समप्रकाशमाने हेतुतया बाह्य

मर्थमक्ष्यादिंद्रियवत् ३४ ओं नवासनाप्रबोधोत्र विचित्रो हेतुतामियात् तस्या
पितत्प्रबोधस्यवैचित्र्ये किं निबंधनं ३५ विचित्रवासनाप्रबोधः नवोपाङ्गित
त्वस्यापि वैचित्र्ये को हेतुः ततो बाह्य एवार्थोभिन्नाभासहेतुः ३५ ओं स्यादे
तदवभासेषु तेष्वेवावसिते सति व्यवहारे किमन्येन बाह्येनानुपपत्तिना ३६
आभासमानैरेवार्थैर्व्यवहारः तेचाभासात्मकाः सन्तु का क्षतिः तत्किं बाह्ये
न कार्यम् तावता लोकयात्रासमाप्तेः बाह्यश्चार्थः प्रमाणबाधितः सावयवो
विरुद्धधर्माध्यासादेः निरवयवश्चादिक्कृयोगादेवं दूषः ३६ ओं चिदात्मैव
हि देवोन्तःस्थितमिच्छावशाद्बहिः योगीव निरुपादानमर्थजातं प्रकाशयेत् ३२
चितत्वमेवेश्वरत्वात्स्वात्मरूपतयापि पराभासरूपमनन्तशक्तित्वादिच्छाव
शात्स्वदादिकारणं विनैव बाह्यत्वेन घटपटादिमर्थराशिं प्रकाशयेत् ३७
अनुमानमनाभातपूर्वे नेष्टमिंद्रियम् आभातमेव बीजादेराभासाद्धेतुवस्तुनः ८
३८ पूर्वावभासान्तःस्थितपदार्थेनान्तरीयकार्थदर्शनवशात्तत्तद्देशकाला
दियोजनया विमर्शनमनुमानम् इंद्रियमप्यनुमीयते किंचित्ताचेतनिमित्त
म् तच्च बीजाद्याभासादाभासितमेव ३९ ओं आभासः पुनराभासाद्बाह्यस्या
सीत्कथञ्चन अर्थस्यनैव तेनास्य सिद्धिर्नाप्यनुमानतः ३९ घटाद्याभासा
द्बाह्यस्यानुपपत्तेः नासीदाभासस्तत्तत्र नानुमानादपि सिद्धिः ३९ ओं स्वा
मिनश्चात्म संस्थस्य भावजातस्य भासनम् अस्त्येव न विना तस्मादिच्छामर्शः
प्रवर्तते ४० चिदात्मनश्चेश्वरस्यात्मनीवाभेदेनार्थेष्वपि प्रकाशोस्त्यन्यथाप्र
तिभासमानार्थैकविषयो निर्मातृतामयो विमर्शः इच्छारूपो न स्यात् ४० ओं स्व
भावमवभासस्य विमर्शं विदुरन्यथा प्रकाशोर्थोपरक्तोपि स्फटिकादिजडो
पमः ४१ प्रकाशस्य मुख्य आत्मा प्रत्यवमर्शः तं विनार्थभेदिताकारस्यापि
स्वच्छतामात्रे न जडाच्चमत्कृतेरभावात् ४१ ओं आत्मात एव चैतन्यं चित्क्रि
या चितिकर्तृता तात्पर्येणोदितस्तेन जडात्स हि विलक्षणः ४२ आत्मद्रव्य
स्वभावात्मकमप्युक्तं जडाद्भेदकं तया विमर्शाख्यमुख्यरूपमुक्तं चेतनं चि
तिशक्तिर्भणितेति सा चेतनक्रिया चितिकर्तृतैव ४२ ओं चितिः प्रत्यवमर्शा
त्मा परावाक्स्वरसोदिता स्वातंत्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ४३ अभि
नवाच्या यावागेषा नित्यचित्स्वरूपत्वेनानाद्यन्तापरतेच भावान्तरानपेक्षं
शुद्धमेतत्स्वातंत्र्यमैश्वर्यसंज्ञकं ४३ ओं सा स्फुरत्ता महासत्ता देशकालाविशे
षिणी सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ४४ स्फुरत्ता स्फुरणकर्तृता अ
भावाप्रतियोगिनी अभावव्यापिनी सत्ता भवत्ता भवनकर्तृता नित्या देश
कालास्पर्शात् सैव प्रत्यवमर्शात्मा चितिक्रिया शक्तिः सा विश्वात्मनः परे

स्य स्वात्मप्रतिष्ठत्वं रूपं हृदयमिति तत्त्वतत्त्वाभासमेतन्निगद्यते ४४ ॐ आत्मान
मत एवायं ज्ञेयीकुर्यात्पृथक्स्थितिः ज्ञेयं न तु तदौन्मुख्यात्खण्ड्येतास्य स्वतन्त्रता ४५
एतादृगस्य हृदयस्य स्वातन्त्र्यमवशमेव घनतादात्म्ययोगेवलब्धप्रतिष्ठं स्वात्मैवमपि तज्ज्ञेयमा
त्मानमनिर्वचितप्रभावनयो ज्ञेयीकरोति भिन्नज्ञेयमाश्लेषत्वे ज्ञानकर्तृतात्मा
येत ४५ स्वातन्त्र्यात्मकमात्मानं स्वान्तेआदधयात्मनः प्रभ्रंशादिसंकल्पैति
मीयव्यवहारयेत ४६ अत एव वेद्येकीभावलक्षणापूर्णात्मसमयाप्स्वान्तेआनन्दा
नीलत्वेमेव वेदकमात्मानमीश्वरः शिवो वेदितेत्येवमादिविकल्पेनाभासयति
भावनादिव्यवहारातमम् ४६ ॐ नाहन्त्वादिपरामर्शभेदादस्यान्यतात्मनः अहं
स्वप्नतयेवास्य स्पष्टेस्तिद्वाच्यकर्मवत् ४७ वर्तमानप्रमात्मभावेनाहितप्रत्यव
मर्शनस्य प्रमेयत्वेन इदन्ताविमर्शभेदेनाभासभेदे च प्रमातृत्वेश्वरशब्देन स्पष्टोहं
परामर्शव्यवधानेन केवलं यथाक्रियादिशब्देन क्रियादयउच्यते पचत्यादिवत्
पचत्यादिसूत्रविनेनाभिधानात् ईश्वरशब्दाद्यासत्शब्दाश्चाहमितिपरामर्शात्मान
मेवेति न साहन्त्वतीति स्वस्यैव स्पष्टैवात्मभवमूलवेतानुभूतस्य ४७ ॐ माया
शक्त्या विभोः सैव भिन्नसंवेद्यगोचरा कथिता ज्ञानसंकल्पाध्यवसायादिनामभिः
प्रकाशात्मनः परमेश्वरस्य मायाशक्त्या स्वात्मरूपं विश्वं भेदेनाभास्यते ततः सैव
चितिर्ज्ञानमध्यक्षे तस्यैव भिन्नस्याभानस्य स्थितिः संकल्पाध्यवसायोमनोबुद्धि
निरूपेणचनापि चितिरेव ४८ ॐ साक्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्यथा
धावनाद्युपपद्येत प्रतिसन्धानवर्जितम् ४९ साक्षात्कारक्षणे ज्ञानेऽपि चितोऽर्थप्र
त्यवमर्शोऽस्ति सूक्ष्मः वाचनधावनादौ शीघ्रक्रियातत्त्वनूद्यमाने दक्षाद्युपादिश्या
जिह्मतानुसन्धानं ततिहि भवेत् ४९ ॐ घटोयमित्यध्यवसानानामरूपातिरेकिणी
परेशशक्तिरात्मेव भासते नविदन्तया ५० अयमितिघटः इति वाध्यवसायो
भिन्नप्रकाशमाननामरूपातिरिक्तचितिशक्तिमय एवात्मैवाभेदेनावभासते ५०
ॐ केवलं भिन्नसंवेद्यदेशकालानुरोधतः ज्ञानस्मृत्यध्यवसायादिसक्रमं प्रतिभा
धानुम भद्रिक ।भा५ सते ५१ चित्तत्त्वस्य मायाशक्त्या भिन्नं घटादिसंवेद्यं तस्य देशकालभिन्नं प्रकाशय
ते यस्याभेदेनावष्टम्भाद्धि भिन्नदेशकालादिना ज्ञानस्मृत्याद्यवभासते ५१
ॐ अहंप्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः नासौ विकल्पः स ह्युक्तो द्वया
दानविनिश्चयः ५२ प्रकाशस्यात्मन्यहमितिपरावाग्रूपत्वात्सोऽभिलापो
पि सद्भावभूतः प्रत्यवमर्शो न विकल्प इत्युच्यते स हि प्रतियोगिनिषेधपूर्वोऽति
श्रयो न चात्र प्रतियोगिसम्भवः ५२ ॐ भिन्नयोरवभासो हि स्याद्घटाघटयोर्द्व
योः प्रकाशस्यैव नान्यस्य भेदिनस्त्ववभासनं ५३ प्रकाशाद्द्वितीयस्य भिन्नस्य प्र
तियोगिनोऽप्रकाशसंजन्यानवभासनेऽप्रकाशेनतत्वेनस्यात्तस्यानाभासेऽव्यपोहना
योगाद्विकल्पनाहानिः ५३ ॐ तदतत्प्रतिभाभाजा मात्रेवातद्व्यपोहनात् तन्नि

प्र॰
प्रि॰ सू॰
४

स्यनमुक्तो हि विकल्पोयमह इत्ययम् ५४ प्रमातर्येव सततं स्थाने लीनतदर्था
भासस्तत्तदपोहनेन तद्व्यतिरिक्तनिश्चयो नाम विकल्पो व्यापारः ५४ ॐ चित्तत्त्वं मा
यया हित्वा भिन्न एवावभाति यः। देहे बुद्धावथ प्राणे कल्पिते नभसीव वा ५५
प्रमातृत्वेनाहमिति विमर्शोऽन्यव्यपोहनात् विकल्प एव स परप्रतियोग्यवभा
सजः ५५ चित्तत्त्वे स्वे ईश्वरस्य मायाशक्त्या भेदावभासिनी निजशरीरे बुद्धावान्तरे
स्पर्शे तदनीले वाकाशे वस्तुन्येव कल्पितेऽहमिति प्रमातृभावेन विमर्शः
तत्तदाभासमानघटादिप्रतियोग्यपोहनकरणाद्घटोयमितिवद्विकल्प ए
५६ व ॐ करोति चित्तावभासेयमपूर्वाभासादियोजना संस्कारात्कल्पनाप्युक्तापि
भिन्नावभासिनि ५६ विच्छिन्नविच्छिन्नेषु स्वदेहाद्याभासभेदेषु पूर्वाभासा
दवाहंकाराणामैक्ययोजनात्मनः पूर्वावभासस्थितिलक्षणात्संस्काराश्रिता।
प्रमातृव्यापाररूपा कल्पनैव प्रत्यभिज्ञाख्या ५६ ॐ तदेवं व्यवहारेपि प्रभु
र्देहादिमाविशन् भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहिः ५७ आदिसं
र्गे व्यवहारकालेपि वा महेश्वरो मायाशक्त्या देहादिमातृत्वेनाभिनिविश्य
प्रमातर्यन्तर्बहिर्वत्त्वेनान्तःस्थितं विभान्तमेव तत्तदर्थक्रमेणावहीरूपेण करोति शक्त्याभा
सयति यथावभासनेन सर्वार्थादनन्तस्य देहाद्यनाविष्टस्य सतो युगपदहमिदमि
ति सर्वार्थप्रकाशः ५७ ॐ एवं स्मृतौ विकल्पे वाप्यपोहनपरायणे ज्ञाने वाप्य
न्तराभासः स्थित एवेति निश्चितम् ५८ सर्वसंवित्सु सर्वार्थाभासः प्रमातृ
संलीनः चिन्मयत्ववदात्मरूपेण प्रकाशमानः सदा स्थित एव ५८ ॐ किंतु नैसर्गि
को ज्ञाने बहिराभासनात्मनि पूर्वानुभवरूपस्तु स्थितः स स्मरणादिषु ५९
ज्ञाने बहिराभासनात्मनि तद्रूपे सहज एव चित्तत्त्वस्यान्तररूपो भासः स्मरणादिषु पू
र्वानुभवात्मा ॰ तदेव स्मृतिसंस्कारजोच्यते ६० सैनसर्गिक एवास्ति विक
ल्पे स्वैरचारिणि यथाभिमतसंस्थानाभासनाद्बुद्धिगोचरे ६१ स्वतंत्रस्य।
विकल्पस्य स्वेच्छया गोचरमपि बुद्धिविषयतापादनेन यथारुचिपूर्वं नभस्तं।
त्वा विमर्शनेन तमेव तं तमसा भासयति सन्निवेशविशेषं च तत्रासावर्थः
सहज एवास्ति ६१ ॐ अत एव यथाभीष्टसमुल्लेखावभासनात् ज्ञानक्रि
ये स्फुटे एव सिद्धे सर्वस्य जीवतः ६२ अपूर्वार्थनिर्माणाज्ज्ञानसामर्थ्याच्च वि।
कल्प एव सर्वस्य सर्वज्ञत्वं सर्वकर्तृत्वं च स्फुटं ६२ ॐ या चैषा प्रतिभा तत्तत्प षष्ठमसमा ह्निकम् ६
दार्थक्रमरूषिता अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ६३ तत्तत्पदार्थ
क्रमास्फुरितस्वैषैतैः स्थित एवाभासः सर्वसंवित्कालव्याप्यक्रमानन्त
चिन्मय आत्मैवेतेः प्रमाता स्वातन्त्र्येण प्रमेयनिर्माता तया महेश्वरस्त्व।
६३ ॐ तत्तद्विभिन्नसंवित्तिमुखैरेकप्रमातरि प्रतितिष्ठत्सु भावेषु ज्ञाते
यमुपपद्यते ६४ अनेकसंवित्तितो मुखैरेकप्रमातरि सिद्धस्पली

यभावभेदाः कार्यकारणतादिव्यवहारसमन्वयं भजंते ६४ ॐ देशकालक्रम
जुषामर्थानां स्वसमाधिनां सकृदाभासमानाध्यासावन्यथाकः समन्वयः ६५
स्वरूपस्वभासनेच भावानां स्वात्मपरिनिष्ठितमेव गुणपदेकाभासनिबंध
नस्तेषां समन्वयः सोभिन्नः प्रमात्रूरूपतया कल्प्यते ६५ ॐ प्रत्यक्षानुप लीन
लंभानेतानतिद्भिन्नांश्चापातिनाम् कार्यकारणतासिद्धिहेतुर्नैकप्रमातृजा ६६
कार्यकभणतासिद्धि भावस्वत स्तिद्धिर पि प्रत्यक्षानुपलंभैरेकप्रमा।
त्रन्वेविनसमन्वयमागता समन्विताः प्रत्यक्षानुपलंभाः क्रमिकस्वविषय
मात्रज्ञानपरिक्षीणा नान्योन्यापेक्षतोपलक्षणक्षमाः ६८ ॐ स्वतो येवस्व।
संवित्तिः प्रमाणं स्वात्मसंभवे पूर्वानुभवसंस्कारवेसाधनेसैवनापरम् ६७ पूर्वा
नुभवस्वसंवेदनस्याभावात्स्मृतिस्वसंवेदनमेवानैकार्थाभासमयप्रमातृरूपं।
स्मृतिस्वरूपेश्वप्रमाणे स्मृतेः पूर्वानुभवाभासभावेकार्यकारणभावसिद्धेः
नकार्यलिंगता ६७ ॐ वाध्यवाधकभावोपि स्वात्मनिष्ठाविरोधिनाम् ज्ञाना।
नामुदियादेकप्रमातृपरिनिष्ठितेः ६८ भिन्नस्वाभासमात्रनिष्ठानां ज्ञानानां।
कोविरोधः तत्कथंवाध्यवाधकत्वमेकप्रमातृविश्रान्तौ तु युक्तम् ६८ ॐ विवि।
क्तभूतलज्ञाने घटाभावमितिर्यथा तथावे शुक्तिकाज्ञाने रूप्यज्ञानप्रमातृवि।
त् ६९ इहभूतले घटो नास्तीति घटाभावज्ञाने केवलभूतलज्ञानमेव शून्यभूत
लस्य घटाभावरूपत्वात् तथैव यद्शुक्तिकारजतयोः अपरस्परात्मकत्वा
च्छुक्तिज्ञानमिति प्रमत्वबाधकम् ६९ ॐ नैवंशुद्धस्य लज्ञानास्तिद्धेनस्याघटा
त्मनः नरूपलब्धियोग्यस्याप्यत्राभावो घटात्मनः ७० केवलभूतलज्ञानाद्भूत
लस्याघटात्मता सिद्ध्यति नतत्त्राघारे भिन्नोदर्शनयोग्योपि घटो नास्तीति ७०
ॐ विविक्तंभूतलं शश्वद्भावानां स्वात्मनिष्ठितेः तत्कथं ज्ञानमात्रं तेन भिन्नस्याभा
वसाधनम् ७१ भूतलमभूतलविविक्तंसदेवतत्कथं तत्ज्ञानं कदाचिदेवतत्रभि
न्नघटाभावं साधयेत् भिन्नघटविविक्तता च भूतलस्य कदाचित्कं रूपं स्यात्।
द्घटसहिततापि कदाचित् स्वरूपं भवत्येवं पदार्थानां सर्वे स्वात्मपरिनिष्ठि
तो साहित्यनतदतिरिक्तम् भयात्मक मेव रूपं ज्ञानमेकं द्व्यंभयात्मकं। पौंभासा
संसर्गात्मकमप्येकाभासे ज्ञानान्तराभावरूपं वस्तुपुनः स्वात्मनिष्ठमेव परि
च्छिन्नतीति न वस्तुवलेन प्रदेशादर्शनात्पदेशासिद्धिवद्घटाभावसिद्धिरभयाभास
ना केकज्ञानात्मककार्याभावव स्यात्र चैवं व्यवस्थानेन प्रतीतिः प्रदेशादर्शनादेवन।
प्यासिद्धेः ७१ ॐ किन्त्वालोकचयोन्यस्य स्पर्शो वा स्यादिको भवेत् तत्रास्तिसाधये
त स्य स्वज्ञानमघटात्मताम् ७२ प्रदेशो ह्यालोकप्रसरेभन्नमसेस्य स्य स्यादिकंस्य
र्शो वा घटरूपस्पर्शाभावात्मकमनन्यथालोकादिद्घटाभावो त्रास्ति घटो नास्ती
ति व्यवहतं युक्तम् ७२ ॐ पिशाचः स्यादनालोको ह्यालोका अनन्तरे येणा अर्ह।
त्पाम् तलस्याकारनिषेधः समर्वणा ७३ नचैवमालोकस्यपिशाचान्यत्वात्

प्र॰
भि॰ हृ॰
५

चपिशाचनिषेधप्रसंगः सदृशरूपेणान्यत्वेपियथाम्भूगोलकस्यान्तरनिवार्य
स्तथालोकस्यान्तरेनतस्मात्समानमतस्त्वाभास्यन्तेपिनादृश्यत्वाभावसिद्धिः ७३
ॐ एवंस्मृतिविदाभावरूपाशुक्तिमतिर्भवेत् नत्वादिवज्जनतद्वासः स्यादप्रामाण्य
वेदिका ७४ शुक्तिज्ञानमेवरजतज्ञानाभावरूपंसिद्ध्यति तदानीन्तनशुक्ति। ज्ञानानुभवे न भिन्नस्य रूप्य॰
ज्ञानस्याप्रामाण्यपसा ७४ ॐ पर्यसिद्धेरपिभवेद्बाध्यानैवान्यमानतः स्वसंवेदन
सिद्धान्तयुक्तामेकप्रमातृजा ७५ शुक्तिज्ञानकालेचनपूर्वरजतज्ञानमस्ति
नतस्याप्रमाणत्वसिद्धिरितिनानुमानेनबाधा एकप्रमातृमयसंवेदनत्वेकेद
शावष्टम्भमयज्ञानमस्मत्वेदभासनान्यिष्यति पश्चात्संवादप्रत्यहेस्व।
संवेदनेपूर्वस्यापितस्याभासनादेकप्रमात्राप्तमितरदन्यत्वेतिभवतिसंवा
दोप्येकप्रमातृकृतः ७५॥ ॐ इत्थमत्यर्थभिन्नार्थावभासखचितेविभौ
समलोविमलोवापिव्यवहारोनुभूयते ७६ मायाशक्त्याभेदविषयोयंसर्वो
व्यवहारः तथाज्ञानिनोशुद्धोज्ञानिनोनुमलिनस्तन्नद्भिन्नार्थावभासभाजि
अनुभवाह्निक ॥ अ॰ १॥
भगवतिसमस्याव्यतेनभवेन ७६ ॐ तात्कालिकाक्षमासस्वसापेक्षाःकेवलं
क्वचित् आभासाअन्यथान्यत्रत्वन्यान्यनमसादिषु ७७ आभासाःकदाचि
त्वविशिष्टप्रत्यक्षाविभाग्येरयमितिव्यवहारहेतोरेवंघनमसादौनपूर्वान्वभवो
चिताः ७७ ॐ विशेषोर्थावभासस्यसत्तायांनपुनःक्वचित् विकल्पेषुभवेद्भा
विभवद्भूतार्थगामिषु ७८ सत्स्वप्येतानुरूपेषुप्रत्यक्षग्रहणातिषुस्वतन्त्रेषु
वान्येषुविकल्पेषुकालत्रयविषयेष्वर्थावभासेनेत्तत्स्यएवावस्थितः ७८ ॐ स्व।
रोदिषुचसोरोदिहेतष्वपिचवस्तुषुअवभासस्यसद्भावेप्यतीतत्वात्तथास्थितिः ७९
सुखदुःखाद्याभासास्तस्यापनाभासासुसंवेदनान्तःसन्तोपितनथाह्लादिमयी
स्थितिंकुर्वन्त्यतीतत्वाद्बहिस्तदानीमभावात्तदाचविशिष्टानांचतथाकारित्वात् ७९
ॐ गाढत्वमुल्लिख्यमानेनविकल्पेनसुखादिके तथास्थितिस्तत्वैवस्यात्स्फुट
मस्योपलक्षणात् ८० क्वचित्त्वियत्तविशेषात्स्वतेत्रकल्पेल्लिखितेस्फुटमेवसु
खादिजाते तथाविकासादिहेतुः ८० ॐ भावाभावावभासानांबाह्यतापिविधि।
ष्यते नात्मासन्नाततस्तेषामान्तरत्वंसतांसदा ८१ भावाभावावभासानामा
वाभावविषयाणामवहीरूपत्वेपिसन्नामेवस्वरूपादौ बाह्यत्वेहितेषामपापि।
नस्वरूपमभावाभासस्यान्तःसत्तायामपिबहिरभावात्तथात्वम् ८१ ॐ अन्त
रत्वात्समात्रैक्येनैषांभेदनिबन्धना अर्थक्रियापिबाह्यत्वेसाभिन्नाभासभेदतः ८२
अन्तस्त्वमर्वेषामेवनीलसुखाद्याभासानांसचसर्वत्वेपिप्रमातृमात्ररूपत्वात्का
र्यकारणादिभेदाअयातार्थक्रियाप्रमातृभेदेपिबोधचालुवपत्वादिभेदनाभास
भेदादाभासाभिन्नार्थकारितापिभिद्यतेरूपादीनाम् ८२ ॐ चिन्मयत्वेवभासा
नामन्तरेवस्थितिस्सदा मायायाभासमानानांवाह्यत्वाद्बहिरप्यसौ ८३ चित्स्व
रूपत्वेनाभासानांसदान्तस्त्वएवस्थितिः मायाशक्त्याबहिःप्रत्यक्षत्वे।

न प्रकाशमाने च प्रकाशाद्यतिरिक्ते च बहिराभासः स्यात् तद्यतेत तदापि तेषा
मान्तरत्वमेव सिद्धत्वादीनां भावानामपि ८३ ॐ विकल्पेयोयमुल्लेखः सो
पि वाह्यः पृथक्प्रथः प्रमात्रैकात्म्यमान्तर्यं ततो भेदो हि वाह्यता ८४ विक
ल्पे घटाद्युल्लेखस्यान्तरत्वायोगाद्बाह्यत्वमाभासभेदादस्त्येव अहं विमर्शी
यान्तरत्वमिदमिति तु वाह्यता एवं घटादीनामुभयी वाह्यान्तःकरणद्व
यीवेद्यता स्वावादेस्त्वेकान्तःकरणावेद्यतैव ८४ ॐ उल्लेखस्य सुखादेश्च
प्रकाशो वहिरात्मना इच्छातो भर्तुरध्यक्षरूपो घटादिवद्वायथा ८५ उल्ले
खस्य सुखदुःखादीनां चेश्वरस्य साक्षात्काररूपो वाह्यः प्रकाशः ८५
ॐ तदैक्येन विना नास्ति संविदां लोकपद्धतिः प्रकाशैक्यात्तदेकत्वं मा
तैकः स इति स्थितम् ८६ तन्नहिच्छिन्नसंविदत्तमन्यानन्यव्यवहारपक।
स्वप्रकाशात्मा तदनुसंधानरूपस्सएवैकः प्रमाता परमात्मसंज्ञः ८६
ॐ स एव विमर्शत्वेन नियतेन महेश्वरः विमर्श एव देवस्य शुद्धे ज्ञानक्रियेय
तः ८७ स परमात्मा चिद्रूपो विमर्शात्मनैव स्वभावेनाव्यभिचारिणा
महेश्वरः चित्तत्वस्य विश्वात्मनः शिवसंज्ञस्याहं विमर्शेनैव शुद्धे ज्ञानक्रि
ये भिन्नाभिन्नेत्येकार्यगतेनेवेश्वरस्य शुद्धाशुद्धे भिन्नार्थविषयत्वेपि सः
सत्वरजोवृत्तिरूपे प्रकाशप्रवृत्तिसंज्ञे तमसा संकुचिते अशुद्धे एव ज्ञानाधि
कारः ८७ ॐ अत एव यदप्युक्तं क्रियानैकस्य सक्रमा एकेत्यादि प्रतिक्षिप्तं
तदेकस्य समर्थनात् ८८ एकचित्तत्वसमर्थनादेकस्यैवापि व्यापारएकएव
वेति क्रियाप्युपाहृता रूपणा ८८ ॐ सक्रमत्वं च लौकिक्याः क्रियायाः का
लशक्तितः घटते न तु शाश्वत्याः प्राभव्याः स्यात्प्रभोरिव ८९ मायाशक्ते
र्भिन्नावभासातो क्रियाकालशक्तिवशात्सक्रमा न त्वात्मविमर्शरूपानादि
निधनाप्रभोः स्वभावभूता ८९ ॐ कालः सूर्यादिसंचारस्तत्पुष्पादिजन्म
वा शीतोष्णे वाथ तल्लक्ष्यः क्रम एव स तत्त्वतः ९० भासामसिद्धा क्रियाकालः
शीतादि वा तदुपलक्षितः सर्वभिन्नावभासमानाभावोपाधिभूतः क्रम एवा
सौ तस्यैवोपयोगात् ९० ॐ क्रमो भेदाश्रयो भेदोप्याभाससदसत्त्वतः आभा
ससदसत्त्वेन चित्राभासकृतः प्रभोः ९१ अन्योन्याभासस्वरूपभिन्नभावावभा
सैव चित्रक्रियैव प्रभोर्भावेषु क्रमहेतुः ९१ ॐ मूर्तिवैचित्र्यतो देशक्रमम् आ
भासयत्यसौ क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः ९२ अनेकस्यान्योन्य
भेदाभासाद्देशक्रमः क्रियास्वेन कालक्रमोपि एकस्य तद्भावस्य तत्तज्जन्मसं
तापरिणामादिक्रियाभेदात्कालक्रम एव ९२ ॐ सर्वज्ञाभासभेदोपि भवेत्का
लक्रमाकरः विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत् ९३ सर्वज्ञा
येवि विच्छिन्नावभासः शून्यदेहादेर्प्रमातुः कालक्रमाभासहेतुः सहिमाक्रा

पद्मुख्यमधि
कम्भोक्ता।
द्विकिक
वःभामधुः

प्र० लोनतथावदानींभासते स्मृतिंविहायस्ववर्तमानापेक्षयाचाऽभासोभूतभवि
सि० वृ० ष्यत्त्वेनव्यवहरति सहक्रमिमानस्यानवभासमानक्रियाविच्छेदादव्यावर्तिगणा।
८ नाभावादात्मनीवार्थेष्वपिनकालभेदः ९३ ॐ देशक्रमोपिभावेषुभातिमात।
हितात्मनः स्वात्मेवस्वात्मनापूर्णाभावाभानस्यमितस्यतु ९४ परिमितप्रमा
तारमपेक्ष्यभावास्ततोऽन्योन्यंचभिन्नाः इत्यादिव्यपदेशभाजस्तत्प्रकाशैकरू
पत्वेनत्वीश्वरस्यतत्काण्डप्रकाशघनस्यनात्मनोभिन्नेहदंवान्योन्यतोवाकिं
चिद्भाति ९४ ॐ किंतुनिर्माणशक्तिःस्याप्येवंविदुषईशतुः तथाविज्ञा
यविज्ञेयभेदोयदवभास्यते ९५ एवंपूर्णतयाप्रकाशमानस्यापिपरमे
श्वरस्यसैषास्यैशक्तिर्यज्ज्ञातृज्ञेयस्वभावाभावाः स्वतोऽन्योन्यंचविभागे (क्रियाधिकारे
नावभास्येते नचतथावभासेनस्वरूपस्थितिस्तिरोधीयते ९५ ॐ क्रिया प्रथममा
सामान्यसंबंधद्रव्यदिक्कालबुद्धयः सत्यास्थैर्योपयोगाभ्यामेकानेका ह्निकम् ॥१॥
श्रयामताः ९६ क्रियावदन्येपिसंबंधादयः एकानेकविषयापिसत्याभा
साः सर्वदोपयोगिनामेषामर्थवत्त्वेनापरिहरणीयत्वात् ९६ ॐ तत्रैक
मान्तरं तत्तद्देवेन्द्रियवेद्यताम् संप्राप्यानेकतांयातिदेशकालस्वभा
वतः ९७ अभिन्नमेवतत्त्वं अन्तर्बहिराभासभेदादेकानेकंबहिर्देशका
लस्वभावभेदाभासस्यस्वभेदभासानामनेकत्वात् ९७ ॐ तद्वदालम्बनात्
तामनोऽनुव्यवसायिसत् करोतिमातृव्यापारमयीः कर्मादिकल्पनाः ९ ८
मध्यस्यतथान्तर्बहिस्तत्त्वविषयामानसाः क्रियादिकल्पनामातृव्यापार
रूपाः ९८ ॐ स्वात्मनिष्ठाविविक्ताभाभावाएकप्रमातरि अन्योन्यान्वय
रूपैक्याद्युक्ताः संबंधधीपदम् ९९ राज्ञःपुरुषइत्यादिसंबंधधियोन्त
स्समन्वयादैक्यं बहिस्संबंधिभेदंचालम्बन्ते ९९ ॐ जातिद्रव्यावभासा
नांबहिरेकरूपतो अक्रमैकदेशातभेदंचाप्यालम्बन्तेविकल्पनाः १००
गावश्चेमेइतिचमतयोबहिरपिगोमात्रैकत्वतत्क्रमविशेषाकाराभासे
कंस्वलक्षणंव्यवभासवक्रत्वेचपरामृशन्ति १०० ॐ क्रियाविमर्शावि।
षयः कारणानांसमन्वयः अवयव्यपिसज्ञावान्वयालम्बादिगादिधीः १९
काष्ठस्थालीदेवदत्तादनातोपचतीत्यत्रसमन्वयादहिर्भेदाच्चैकानेक
विषयाक्रियामतिः देशकालक्रमोपिभातिभावानामवयवपिसहू
पाणामन्योन्यापेक्षसमन्वयभेदएव तथैवैकानेकमयः जातिद्रव्यक्रि।
यासंबंधादिमतयः सर्वापेक्षसंबंधविशेषसमवायविषयाएव १०१
ॐ एवमेवार्थसिद्धिस्स्यान्मातुरर्थक्रियार्थिनः भेदाभेदवताऽर्थेनतेनतन्न
भातिरीदृशी १०२ एकानेकरूपैरेवक्रियादिभिरवभासमानस्तत्स्वरूपः
प्रमातृतद्दर्शिनोर्थक्रियासंवादः ततोनतत्तद्द्वयोर्भ्रान्ताः १०२ कावात

भेदाभेदविमर्शनेन द्वितीयमाह्निकम् ॥ इदमेतावदित्येवं यद्वशा-
द्व्यवतिष्ठते वस्तु प्रमाणं तत्सोऽपि स्वाभासोऽभिनवोदयः सोऽन्तस्तथाविम-
र्शात्मा देशकालाद्यभेदिनि एकाभिधानविषये मितिर्वस्तुन्यबाधिता ॥
यदायत्ता हि वस्तुनः स्वरूपाणां नित्य— दिविशेषेणावस्थाप्यमानता
स प्रमातुः स्वचेतार्थवस्त्वाभास एवास्थित इति प्रमाणम् स एव चाभासोऽय
मिति नित्यमुदितः तथैव स्वरूपक्रियाभिनवत्वेन च प्रमातृरूपावष्टंभे विमर्श
रूपतामापन्नो विमर्शोऽभेदान्तःसार्येकैकशब्दवाच्यपृथक्करणोऽवतिरस्कृत
देशादिभेदेन स्थिताभात एवमाभासरूपे वस्तुनि स्वकार्येऽर्थक्रियापन्नेः
प्रमाणान्तरेणावाधितस्थैर्यः प्रमितिः प्रमातृव्यापारः ४ ५ यथारुचि य
थार्थित्वं यथाव्युत्पत्ति भिद्यते आभासभेद एकस्मिन्नप्यर्थे यानसाधिते ॥
एकस्मिन्नेव चैकप्रत्यवमर्शसामर्थ्योपपादिते वस्तुनि स्वेच्छावशादर्थित्वा
नैराश्याद्वानैपुण्यवशाद्वावभासभेदाः ६ तथा हि दीर्घवृत्तोर्ध्वपृथुबुध्न।
चालनतादिभिः यथावभासाभिद्यन्ते देशकालाविभेदिनः ॥ तथैवमेघट
इत्यकोचनोज्ज्वलतादयः आभासभेदाभिमतार्थकारिणस्तदर्थिनः ॥ एकस्मि
न्नेव घटादावर्थे तत्तद्विविधिप्सावशाद्दीर्घतावृत्तता पारिमाण्डल्यादि चाभाति
चित्रकल्पध्यानच्छायामात्रार्थितायां पृथुबुध्नोर्ध्वमात्रं भाति न कार्था
र्थितायां तद्व्यत्नेग्नास्वमाणस्य पृथुषाभ्रममात्रमेव कस्यचिदाभासते न हि द
स्तुतासीत्यापि मणिरूप्यादिविशेषव्यभावः स च तथाभियमानोऽपि देशका
लभेदं न स्पृशति तथैव घटे एवमस्त्रीत्वाभासोऽन्याहृतेव एतावतेनार्थार्था
र्थमात्रसाधारणः स्तनाभात्रसाधनमन्यायामर्शोद्यर्थक्रियाकारीति तेनैव घट इति
चाभासोऽन्तर्वहिष्करणज्ञेयः पृथुबुध्नोदराकारार्थसामान्योऽन्य एव यः एतादि
शुनास्ति कांचन इति च स्यामयात्स्नाशुनास्तितद्यार्थितादिवशादेकैकरूप
वज्ञायेत एकैकस्याभासाभास एकैकशब्देन व्यवहारार्थं तत्तन्नियतार्थक्रि।
यार्थिभिः घट इति सत्त्वाभिधीयते न कांचन इति वृत्ताभासमेवेत्युक्ता
दिसाधारणो देशादिरहितस्तथैव वचनतोऽर्थक्रियाभिन्ना ८ आभासभेदाद्व
स्तुनो नियतार्थक्रिया पुनः सामानाधिकरण्येन प्रतिभासादभेदिनाम्
एकस्मिन्नेव स्वलक्षणेऽन्याभासे नियतशक्त्याकार्यनियमिते तथाभूतानेक
ककार्यकृदाभासभेदाधिकरणमेकं च सामानाधिकरण्याभासवशाद्वस्तु तेक
त्वे एकता हि सामानाधिकरण्यम् ९ ॥ हृष्टदीपप्रकाशान्तेत्यातसामान्येय
था प्रतिहृह्यावभासानामेककार्यीतथैक्यधीः ॥ भिन्नाः प्रदीपप्रभाप्रतिभा
गेनावभासन्ते नदीप्रवाहाः सिंधुद्वेशानके चेतनेतरताः तथापि लक्ष्य महत्त्वप
टाद्यवभासाः परस्परानुप्रवेशात्समाः तत्सुनीलपीताद्यवभासाः तत्तदेकका

ई.
श्व प्र.
ज्ञा. टी.
७

यैकदृग्याभासस्वभावेनकल्प्यतेप्रत्यक्षएवतत्सामानाधिकरण्यम् १०९
ॐ तत्रापि विशिष्टैव ह्यादौ कार्यकारणतोष्मता तत्र क्वचिद्धार्थता दान्यप्रमाण
देकतो मातः ११० कदाचिद्देशादिसहभावावच्छिन्नस्वलक्षणरूपविशेष।
स्यारोपेनैकसामान्यरूपार्थाभासमात्रएव त्रैलोक्यत्रैकाल्यगामित्वेन निज
प्रमाणादेकस्मादेव विशिष्टकार्यकारणतोर्धभागग्निशब्दवाच्यतासि
द्धिः ११० ॐ मातृदेशादिकाध्यक्षान्तरभित्स्वलक्षणा तात्कालिकी प्रवृत्ति
स्यादर्थिनो ऽनुमानतः ११ कायप्रवृत्तिपुनर्देशकालादिप्रत्यक्षभेदा
माहित्य तत्स्वलक्षणप्रतदर्थितयाप्रमाणास्मृहादेवानुमानादपि यस्मि
प्रत्यक्षविशिष्टादेव प्रवृत्तिः ११ ॐ हृतान्तिकतया स्थानापरोक्ष्यक्षता
मता वाह्यान्तरतयादेहव्यंजकस्यान्यथापि वा ११२ ॐ भिन्नावभासच्छाया
यामपि स्यात्पावभासतः एकप्रत्यवमर्शाख्यादेकत्वमनिवारितम् ११३
हृतान्तिकादिषु स्फुटत्वास्फुटत्वादिना वहिरन्तश्चत्वेन वा भासस्य छाया
मात्रे भेदे ऽपि तोय[illegible]भावरूपप्रत्यवमर्शैक्यादर्थानामेकत्वमपवाधितम् ११
ॐ अर्थक्रियापि सहजा नार्थानामीश्वरेच्छया नियता सा हि तेनास्या नाक्रि
यातो ऽन्यथा भवेत् ११४ उष्णत्वघटादीनां वाह्यार्थक्रियाविरहे ऽपि घटादि
तैव स्वाभाविकत्वात् सर्वस्वरूपाणां प्रमाणेन नियमितायाः ११४ रजते का[illegible]म
र्थो ऽपि शुक्तौ न रजतस्थितिः उपाधिदेशासंवादाद्धि चेद्दृष्टे ऽपि न सो ऽन्यथा ११५
रजते शुक्तौ च रजतविमर्शैक्येन रजतत्वे ऽपि पुनः शुक्तिदेशासंगतिवाधेन
नापि संवादाभावाद्धेतुश्चेत् स्थैर्याज्ज्ञानाद्धि चेद्दृष्टे ऽपि न सोदेशासंवादान्नि
ष्या ११५ ॐ गुणैः शब्दादिभिर्भेदो जात्यादिभिरभिन्नता भावानामित्थमेक
त्र सर्वत्रैषुपपद्यते ११६ भावानां शब्दस्पर्शरूपरसस्यादिना भेदो ऽन्यैः जात्या
दिना चैकताद्यप्रतन्मयमानः प्रमातैक्ये घटते अन्योन्यभेदव्यवस्थापन
मेयानां यत्ना ११६ ॐ विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे विरुद्धाभावसं
स्पर्शे परमार्थसतीश्वरे ११७ ॐ प्रमातरि पुराणे तु सर्वदाभातविग्रहे किं प्र
माणं नवाभासः सर्वप्रमितिभागिनि ११८ अपूर्वाभासस्यासिद्धस्य साध
नाभिन्न्यावभासिनः प्रमातृप्रमाणपयोगः न तत्र वा वभासितानन्य माण
स्वात्मा मेसप्रमाणमनन्य सु स्वात्म तस्यात्मनः सदासिद्धस्य केवलेछिन्नः प्रमितौ
स्वातन्त्र्याद्वमातैव तत्तद्विचित्रविमर्शाभासास्मिन्त्स्यायिनिर्वाधवितेनोपपद्यते
तदिच्छा तो परावभासमानार्थानां तन्मात्रेहरूप संपोचमयाशक्तिव शाउन्म।
ज्जनं निमज्जनं च तत्स्यायापराधीनासमासदानन्तीस्तानतीविरुद्धस्याकम्
धस्याभावादियोगात्सो ऽपि यावदुपदिश्यते भावाभावाभ्यां तावत्स एव प्रमा
तां भजते उपदिदिक्षोरभावादुपदेशानुपपत्तिः ११८ ॐ अप्रवर्तितपूर्वे

त्रो केवलं मूढभावशात् शक्तिप्रकाशेनेशादिव्यवहारः प्रवर्त्तते ११९॥
मायाख्यमोहवशात्केवलमस्मिन्नात्मनि प्रमातृरूपे शिवस्यादिव्यवहा
रो येन प्रवर्त्तितः सत्युक्तसातेश्यादिहेतुप्रदर्शनेन भावनाद्युपदेशाय स्था
प्यते ११९ ॐ एष चानन्तशक्तित्वादेवमाभासयत्यमून् भावानिच्छावशा
देषा क्रियानिर्मातृतास्य सा १२० प्रमाता चिद्रूपोऽनन्तशक्तिरीश्वरः स्वे
च्छावशान्नानाभासानाभासयेत् सैवेच्छाशक्तेः निर्मातृताख्या क्रिया
तस्य १२० जडस्य तु न सा शक्तिः सत्ता यदसतः सतः कर्तृकर्मत्वनैव कार्य
कारणतायतः १२१ जडं प्रधानपरमाणुवीजादि तु न शक्तमसतो निर्मा
णे कर्तृत्वमेव हि कारणत्वं कर्मत्वं च कार्यत्वं न त्वन्यत् १२१ ॐ यदसत्त
दसद्युक्ता नासतः सत्त्वरूपता सतोपि न पुनः सत्तालाभेनार्थो यचोच्यते १२२
कार्यकारणता लोके सान्तर्विपरिवर्त्तिनः उभयेन्द्रियवेद्यत्वं तस्य कस्या
पि शक्तितः १२३ असतः सत्त्वभावता वितथा सतश्च सिद्धा सिद्धस्य वा
न्तर्वाह्यान्तःकरणद्वयीवेद्यतापादनमीश्वरेणोत्पादन १२३ ॐ एवमेका
क्रिया सैषा सक्रमान्तर्वहिः स्थितिः एकस्यैवोभयाकारसहिष्णोरुपपा
दिता १२४ सैषा क्रियान्तर्वहिः स्थितिरूपतया सक्रमाप्येकस्य स्वसंवि
त्सिद्धस्य कर्तुराभासच्छायाभेदेनैकत्वेन प्रत्यवमृश्यकर्मणश्चैकस्य सं
बंधिनी तदभिन्नाश्रयत्वादेकत्वेन साधिता १२४ ॐ वहिस्तस्यैव तत्का
र्ययदन्तर्यदपेक्षया प्रमात्रपेक्षयाचोक्ताद्वयी वाह्यान्तरस्थितिः १२५
अर्थस्य वाह्यतापादनं ततो वाह्यता कार्यता चेकापेक्षया प्रमातारमपेक्ष्य चा
न्तर्वहिर्व्यवहारः ॐ मातैव कारणं तेन स चाभासद्वयस्थितौ कार्यस्यास्थि
तये वैकल्पदेकस्य क्रियोचिता १२६ एवं प्रमातैव कारणं स च वाह्यान्तरका
र्याभासक्रमैकत्वेनैवमप्येकस्य कर्तुः क्रिया सिद्धा १२६ ॐ अत एवा
ङ्कुरेपीष्टा निमित्तं परमेश्वरः तदन्यस्यापि बीजादेर्हेतुता नैव युज्यते १२
वाह्याभासतापादनमुत्पादनमिति चिद्रूपस्यैव कारणता ततोऽङ्कुरादौ
निमित्तकारणत्वेनेश्वरः केश्चिदिष्टः न चापि बीजादेर्जडस्य कारणता निर
न्वसेयानस्य युक्ता २७ ॐ तथा हि जडभकारोसावैश्वर्यैव व्यवस्थया तत्तद्
दादिसंस्कारः क्रमेण जनयेत्तद्दृढम्" ॐ अकाररूपे प्रमातरि कारणे स्थितौ
पिस्दादिसंस्कापेक्षया घटस्येश्वरकृतनियतिसंज्ञमर्यादया न स्वभा
वेन २८ २९ योगिनामपि मृद्बीजे विनैवेच्छावशात्मनः घटादि जायते तत्तत्स्थि
रस्वार्थक्रियाकरम् ॥ मृदाद्यनपेक्ष्य योगिनामिच्छामात्रेण घटादेः स्थि
रस्य घटाद्यर्थक्रियाकारिणश्च निर्वृत्तिः ३० योगिनिर्माणताभावे प्रमा
णान्तरनिश्चिते कार्यहेतुः स्वभावो वा न एवोत्पत्तिमूलजः ॥ अत एव का

क्रियादिकारेमानतत्त
लक्षणनिरूपणांतरतृ
यमाह्निकम्
२

प्र०
सि० ९६
८

र्यस्वभावोवातदन्यत्वनिर्भासोयोगिनिर्मितत्वाभावनिश्चयाभावोहेत्वाभा
सत्वनिश्चयेनपुनरीश्वरनिर्माणपक्षेद्वयाहेतुतास्यात् ३१ भूयस्तत्तन्मात्रे
कवह्न्याभासादितोभवेत् परोक्षस्याप्यपिपतेर्धूमाभासादिक्तनम् ॥का
र्यमव्यभिचार्यस्यलिङ्गमन्यप्रमातृगात् तदाभाससत्तदाभासादेवत्वपिपा
तेःपरः ॥ वह्न्याभासस्फुरणपूर्वकोपिजायमानोधूमाभासोह्रदादौनिय
तशक्त्याकृतसामर्थ्यादग्न्याभादेवतत्तदेशगततत्तन्मात्रत्वसाधारणात् ।
सैवसोव्यभिचारेणगमकः जातस्तु स्वधूमाभासस्तद्वह्न्याभासस्यान्त
परित्यागात्तत्त्वमात्रत्वकरणाद्धूमाभासादेव अस्मिन्सतीदमस्तीतिकार्यका
रणतापियासाम्यपेक्षाविहीनानांजडानांनोपपद्यते ॥ अस्मिन्सतीदंभवती
तिनियतेपौर्वापर्येकृतिकारोहिएतद्द्वययोरकार्यकारणयोरप्यस्तीतिपूर्व
स्यसामर्थ्यपरस्यसत्तेतिस्यात्कार्यकारणभावः तत्त्वापेक्षारहितानांजडानां
नयुक्तंपरावेदनस्यात् पूर्वस्यसामर्थ्यपरस्यसत्तानैवेवंकिंचिद्भक्तंस्यात् न ।
चपूर्वस्यसामर्थ्यलक्षणःस्वभावःपरसत्तारूपः ३४ नहिस्वात्मैकनिष्ठानामन
नुसन्धानवर्जिनाम् सदसत्तापदेष्वेषसामर्थ्यः प्रकल्पते ॥ सदसद्वाकार्यकारण
मप्यात्मपर्यवसितेजडमवभेधानस्वत्वेनान्यापेक्षस्वभावेनतत्स्वतान्त्रप्रया ।
नापेक्षामयोगणविभक्तर्ष्योद्घटते ३५ अतएवविभक्तार्थः प्रमात्रेकसमा
श्रयः क्रियाकारकभावाख्योयुक्तोभावसमन्वयः ॥ एकप्रमातृसंलग्नत्व
क्रियाकारकभावाख्योविभक्तार्थोभूमिबीजोदकादीनांसमन्वययोयुक्तोनत्व
पृथक्त्वोन्यःकार्यकारणभावः ३६ परस्परस्वभावस्यैककार्यकारणयोरपि एक
त्वमेवभेदेहिनैवान्योन्यस्वभावता ॥ कार्यकारणयोरन्योन्यरूपत्वेपैकत्वेव
स्यान्नतद्भावः ३७ एकात्मनोविभेदेनक्रियाकालविभागिनी हेतोःस्या
त्कर्तृतैवेवंतथापरिणामतया ॥ एकस्वभावस्यभेदेनस्थितिःपरिणा
मःकालकलितःक्रियैवततःपरिणामस्वतंत्रस्यशक्तिमतःकर्तृतैवहेतु
ता ३८ नचयुक्तंजडस्यैवंभेदाभेदविरोधतः आभासभेदएकत्रचिदात्मनित्व
युज्यते ।३८ जडस्याभिन्नात्मनोभेदेनावस्थितेर्विरोधादयुक्तम् स्वच्छेचिदात्म
न्येकस्मिन्नेवैकप्रतिबिम्बधारणेनाविरोधाद्युज्यते ३९ ओंवास्तवेपिचिदेकत्वे
नस्यादाभासभिन्नयोः चिकीर्षालक्षणैकत्वपरामर्शविनाक्रिया ।३९ एक
स्मिंश्चिन्नेवेष्येकस्सदाभासभेदोनघटते नचतत्रक्रियात्वं यदात्तसचिदात्मात
याचिकीर्षयापरामृश्यान्बहिराभासयति तदातद्घपपद्यते जडस्याप्यस्ति भवती
त्यस्यामपिसत्ताक्रियायांवमृषायोगेनसातेर्याभावादकर्तृत्वं तेनप्रमातैव
तेभावयतितेननतेनवाहिमाचलादिरूपेणसभवतीत्यत्रपरमार्थः ।३९ ओं३ ।
स्येतथाघटपटाद्याभासजगदात्मना तिष्ठासोरेवमिच्छैवहेतुताकर्तृताक्रिया १०
चिद्धपुषःस्वतंत्रस्यविश्वात्मताकर्तृमिच्छैवजगत्प्रतिकारणताकर्तृतारूपासे

वक्रियाशक्तिः एवंचिद्रूपस्यैकस्यकर्तुरेवचिकीर्षाख्याक्रियामख्यातानाकर्तृत्वेक
मौक्तिकमृदीनांकर्तृत्वमुपचारतः १५०॥ ओं क्रियाधिकारःसमाप्तः ॥ चतुर्थमाह्निकम् ४।
ओं एवमन्तर्बहिर्वृत्तिः क्रियाकालक्रमानुगा मातुरेवतदन्योन्यावियुक्तेज्ञानकर्मणी ।५१
प्रमातुरन्तःस्थितस्यात्मनोबहिष्कारएवक्रमावगताक्रियेतिपरस्पराविरहितेतस्य
ज्ञानक्रिये १५१ ओं किन्त्वान्तरदशोद्रेकात्सादाख्यंतत्त्वमादितः बहिर्भावपरत्वेतुप
रतःपारमेश्वरम् १५२ ईशितान्तर्बहिःस्थितावन्तर्भावग्राह्यान्येषुनःसादाख्येत
त्वमपरंबहिर्भावोद्रेकादैश्वरम् १५२ ओं ईश्वरोबहिरुन्मेषोनिमेषोन्तःसदाशिवः
सामानाधिकरण्यंचसद्विद्याहमिदंधियोः १५३ उन्मेषनिमेषौबहिरन्तःस्थितीएवे
श्वरसदाशिवौबाह्यान्तरयोर्वेद्यवेदकयोः एकचिन्मात्रविश्रान्तेरभेदात्सामाना
धिकरण्येनेदंविश्वमहमितिविश्वात्मनोमतिः शुद्धविद्या ५३ ओं इदंभावोपपन्नानां
वेद्यभूमिमुपेयुषाम् भावानांबोधसारत्वाद्यथावस्त्ववलोकनात् ५४ भिन्नवेद्यप्र
माविदन्तयाहन्तयामापादितानांभावानांचिन्मात्रसारत्वादहमिदमितितत्त्वप्र
तिपत्तिःशुद्धतात्त्विकी ५४ ओं अत्रापरत्वंभावानामनात्मत्वेनभासनात् परताहन्त
याच्छादात्परापरदशाहिसा ५५ अत्रैदन्तामतेरपरत्वमहन्तयासर्वस्यवेद्यस्याच्छा
दनात्परतेतिपरापरावस्थेषा ५५ ओं भेदधीरेवभावेषुकर्तुर्बोधात्मनोपिया मा
याशक्त्येवसाविद्येत्यन्येविद्येश्वरायथा ५६ बोधकर्तृतामयस्यापिभेदेनविश्व
स्यवेद्यतेतिकेचित् मायाशक्तिरप्यवाविद्यासंसारोन्मीलनात् तत्रस्था
मंत्रेश्वरविद्येश्वराः ५६ ओं तस्यैश्वर्यस्वभावस्यपशुभावेप्रकाशिका विद्या।
शक्तिस्तिरोधानकरीमायाभिधापुनः ५७ संसारिणामैश्वर्यस्यात्मनःप्रतिभि
ज्ञानेविद्यायापशुभावेमायया ५७ ओं भेदेत्वेकरसेभातेहन्तयानात्मनीक्षिते ।
शून्येबुद्धौशरीरेवामायाशक्तिर्विजृम्भते ५८ यदाभावाभेदेनेदन्तयैवंभासन्ते
हमितिप्रमातृत्वेनचदेहादिस्तदाविपर्ययहेतुर्मायाशक्तिर्विमोहिनी
नामविजृम्भा १५८ ओं यश्चप्रमाताशून्यादिःप्रमेयव्यतिरेकिणि मातामेयः
सन्कालादिकपंचकवेष्टितः १५९ यश्चव्यतिरिक्तप्रमेयजातेप्रमाताशून्या
दिःसइदमितिवेद्यएवसन्ततःकालाद्यैःपंचभिस्वपरतंत्रीकृतः तत्रकाकला
हर्तेमानाभासेननतस्यक्रमविच्छिन्नसंभवः नियतेःकार्यकर्मफलनियमः रा
गाद्वेषादिषंगः विद्याकलाभ्यामचिदात्मनोप्तत्रस्यापीषज्ज्ञानक्रियेचिन्त्या
नैयतुरूपे १५९ ओं त्रयोविंशतिधामेयंयत्कार्यकरणात्मकं तस्याविभागरूप्येकं
प्रधानंमूलकारणं १६० ओं त्रयोदशाविधाबाह्याबाह्यान्तःकरणावली कार्यव
र्गश्चदशधास्थूलसूक्ष्मत्वभेदतः १६१ कार्याणिहियाशब्दस्पर्शरूपरसगंधानिसू
क्ष्माणितन्मात्रसंज्ञानिपंच अन्योन्यबृंहणानासंबंधेनस्थूलानिपृथिव्यादिसंज्ञानि
तान्येवपंचश्रोत्रत्वगक्षिजिह्वानासिकेतिपंचबुद्धीन्द्रियाणि वाक्पाणिपादपा

भ्री
मि हृ०
९

रूपस्यानि पंचकर्मेन्द्रियाणि । मनो बुद्ध्यहंकारा इति त्रियान्तःकरणमिति त्र।
यो विंशतिभेदस्य कार्यकारणात्मनः प्रमेयस्य मूलम् मूलं अनेकाविभागदशा प्रधा
नाख्या १ ५१ ॐ तत्त्वे तन्मात्रतामात्रस्थितौ रुद्रोऽधिदैवतम् भिन्नप्रमेयप्रसरे ब्रह्म
५० विष्णू व्यवस्थितौ ५२ ॐ मूलं च बुद्ध्यहंकारपर्यन्तं सूक्ष्मदेहमयं प्रमात्रमात्रे स्थितौ । ज्ञानाधिकारे प्रथमम् आह्निकम्
अन्यप्रमेयोपसंहारे रुद्रोऽधिष्ठाता भिन्नप्रमेयाभासे सर्गस्थितिहेतू ब्रह्मविष्णु ।५२
ॐ एष प्रमाता मायान्धः संसारी कर्मबन्धनः विद्याभिज्ञापितैश्वर्यश्चिद्घनो मु
क्त उच्यते ५३ मायीयशून्यादिप्रमाता नियतिनियमितः संसारी विद्यावशाद
त्मतत्त्वाभिज्ञतया मुक्तः ५३ ॐ स्वांगरूपेषु भावेषु प्रमाता कथ्यते पतिः मायातो
भेदिषु क्लेशकर्मादिकलुषः पशुः ५४ ऐश्वर्यदशायां प्रमाता विश्वशरीरतया प
शुपतिः पुंस्त्वावस्थायां रागादिक्लेशकर्मविपाकाशयैः परीतः पशुः १५४
ॐ स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता द्विधाणवं मलमिदं स्वस्वरूपापहा
नितः ५५ स्वातन्त्र्यबोधः परमार्थस्तत्स्वरूपत्वादेव पूर्णः तस्य स्वातन्त्र्यादेव तथेच्छया
स्वातन्त्र्यविना बोधमात्रं निर्माणे बोधं तां विना स्वातन्त्र्यमात्रं निर्माणे वा पूर्णत्वाभावे
न परिमितत्वाद्विधाणवम् तात्विकरूपविपर्यासात्मलत्वम् ५५ ॐ भिन्नवेद्य
प्रथात्रैव मायाख्यं जन्मभोगदम् कर्तर्यबोधे कार्मं तु मायाशक्त्यैव तत्त्रयम् ५६
अत्रैवं द्विधाणवे वेद्यमभिन्नमपि भेदेन यदा भाति तदतोऽपि विपर्यासमनात्मा मायी
यमलम् अहंता मामपि कर्मणां जन्मादिहेतुभावे विपर्यासाद्बोधात्मककर्तृत्व
गते कार्मम् तन्मलत्रयनिर्माणे प्रभोरिच्छा मायाशक्तिरुच्यते ५८ ॐ शुद्धबोधात्म
कत्वेऽपि येषां नोत्तमकर्तृता निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात् ५७
बोधात्तत्परत्वबोधानामपि पूर्णकर्तृत्वशून्यात्स्वरूपादन्यत्वेन प्रभुणा निर्माणं ५७
बोधादिलक्षणैक्येऽपि येषामन्योन्यभिन्नता तत्रेश्वरेच्छाभेदेन ते च विज्ञानकेवलाः ५८
शुद्धबोधानां बोधत्वनिमित्तत्वाद्युभेद्यप्यन्योन्यभेदस्तथैवेश्वरेण निर्माणान्नान्यथा
ते च सांख्यदृष्टिप्राया विज्ञानकला उच्यन्ते ५७ ॐ शून्याद्यबोधरूपास्तु क
र्तारः प्रलयाकलाः तेषां कार्ममलोऽप्यस्ति मायीयस्तु विकल्पितः ५८ शून्यप्रा
णादौ देहरूपतातिक्रमेणाहन्तया स्थिताः प्रलयकेवलिनः तेषामणुत्वक
र्मसंस्कारोऽस्ति मायामलस्तु वेद्ययोगाद्योगाभ्यां विकल्पितः ५९ ॐ बोधानामपि
कर्तृत्वजुषां कार्ममलस्तथा भिन्नवेद्यजुषां मायामलो विद्येश्वराश्च ते ६०
कर्तृयोगेऽपि बोधानां कर्मक्षीणत्वाद्विद्येश्वरात्मनो भिन्नवेद्यभाक्त्वेन मायाम
लम् ६० ॐ देवादीनां च सर्वेषां भविनां त्रिविधं मलं तत्रापि कार्ममेवैकं मुख्यं सं
सारकारणम् ६१ कलाद्वलितमेतच्च चित्तं स्वकर्तृतामयम् अचिद्रूपस्य शू
न्यादेर्मितं गुणतया स्थितम् १६२ ॐ स्फुटत्वे कर्तृतायास्तु बोधस्य च चिदात्मनः
शून्यादौ तद्गुणे ज्ञाने तत्समावेशलक्षणम् ६३ ॐ शून्ये बुद्ध्यादौ भावात्मन्यहंता

कर्तृतापदे अस्फुटारूपसंस्कारमात्रिणि ज्ञेयशून्यता ६४ ॐ प्रमातानामान्तरी
वृत्तिः प्राणादिप्रेरकात्मता जीवनाख्योऽथवा प्राणो हन्तापर्यष्टकात्मिका ६५
तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमं सवेद्यमपवेद्यं च मायामलयुतायुते
मनोमात्रपथेऽप्यादिविषयत्वेन विभ्रमात् स्पष्टावभासाभावानां सृष्टिः स्वप्नपदं म
तम् ६७ ॐ सर्वाक्षगोचरत्वेन या तु बाह्यतया स्थिरा सृष्टिः साधारणी सर्वप्रमातॄणां
स जागरः ६८ हेयात्रयीयं प्राणादेः प्राधान्यात्कर्तृतागुणा तद्वतोऽपि च यथायद्
रक्तुः स्वादियोगतः ६९ प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः तच्छेदात्मा
समानाख्यः सौषुप्ते विषुवत्स्थितः ७० ऊर्ध्वं गामुदानाख्यः स्तुर्यगो हुतभुङ्मयः
विज्ञानाकलमन्त्रेशो व्यानो विश्वात्मकः परः ७१ स्वात्मैव सर्वजन्तूनामेकएव महे
श्वरः विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहितः ७२ तत्र स्वसृष्टेदंभागे बुद्ध्यादिग्राहका
त्मना अहंकारपरामर्शपदं नीतमनेन तत् ७३ स्वस्वरूपापरिज्ञानमयोऽनेकः प्रमात्मनः
तत्र सृष्टौ क्रियानन्दो भोगो दुःखात्मकः ७४ स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया
च या मायातृतीये ते एव पशोः सत्त्वं रजस्तमः ७५ भेदस्थितेः शक्तिमतः शक्तित्वे
नापदिश्यते एषां गुणानां करणकार्यत्वपरिणामिनाम् ७६ स्वाभानन्दः क्रियाप
रभेदसंभावोऽपि साम्यसोः इयान्मातरजोधः स्वं क्लेशेषि सत्त्वतयोमयम् ७७ येषा सा
मयिके दन्तापरामर्शभवः प्रभोः तेऽपि मिश्रा विमिश्राश्च तथा विद्रावभासिनः ७८
तेऽनभिज्ञावभासार्थाः प्रकल्प्याः प्रत्ययात्मनः तत्र हि मिश्रसंज्ञाभिः स्वस्वत्वेन
दिगोचरे ७९ तत्साधारणी सृष्टिरीशसृष्टोपजीविनी सेयं प्रवज्ञानतया स विशे
षात्तदात्मनः ८० स्वविश्रान्तिपरोरूपयाचलया प्राणरूपया विकल्पक्रियया त
तद्गूर्वैचित्र्यचित्रया ८१ साधारणोऽन्यथाचैष सर्गः स्पष्टावभासनात् विकल्प
हानेनैकाग्र्यात्क्रमेणेश्वरतापदम् ८२ सर्वो ममायं विभव इत्येवं परिजानतः वि
श्वात्मनो विकल्पानां प्रसरेऽपि महेशता ८३ मेयं साधारणं मुक्तः स्वात्माभेदेन म
न्यते महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत् ८४ ॐ सर्वथा त्वन्तरालीनानन्ततत्त्वौघनि
र्भरः शिवाश्चिदानन्दघनः परमाक्षरविग्रहः ८५ एवमात्मानमेतस्य सम्यग्ज्ञानक्रिये
तथा पश्यन्यथेप्सितानर्थान् जानाति च करोति च ८६ इति प्रकटितो मया सुघट
एष मार्गो नवो महागुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा तदत्र निदधत्पदं
भुवनकर्तृतामात्मनो विभाव्य शिवतामयीमनिशमाविशन्सिध्यति ८७ तैस्तैर
प्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके कान्तो लोकसमान एवमपरिज्ञातो न
रन्तुं यथा लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो नैवालं निजवैभवा
य तदियं तत्प्रत्यभिज्ञोदिता ८८ ॐ जनस्यायत्नसिद्ध्यर्थमुदयाकरसूनुना ईश्वर
प्रत्यभिज्ञेयमुत्पलेनोपपादिता १८९ ॥: इति श्रीमन्नवरसभट्टारकेनप्रत्यभि
ज्ञाहृतिसत्सम्प्रणीकृतेतिश्रमसत्त्वदेवादीनां मान्तव्यकीटकानाम् ॥

ई अवरप्रत्य मिज्ञा पत्र ३१३ 72

श्लोक संख्या प्रति पत्र ६६

२०५२६ बीस हजार पांच सौ छब्बी

नं० ४८

६
प्र· ज्ञा·
वि·वि·
१

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नमो प्रणवार्थाय शुद्धज्ञानैकरूपिणे
निर्मलाय प्रसन्नाय श्रीदक्षिणामूर्तये नमः ॐ नमः शिवाय ॐ श्री
गुरवे नमः ॐ श्रीमल्लक्ष्मीविद्यारूपाय गुरवे नमः ॐ श्रेयोस्तु ॐ नम
स्विगुरुस्वदेवेभ्यः ॥ ॐ श्रीशाक्तिचिन्तयाविद्योगिहृद्यं विभवतदेका
त्मसाक्षात्कारनिर्भरदात्मभावनिष्ठतेलाशेषविस्पन्दितम् श्रीमद्भै
रवधामतद्विजयतेभक्तान्तरात्मस्फुरल्लोचनशोभनसंग्रहेणान्तरुत्तया
यद्विश्वरूपायते ॥ लब्ध्वानुग्रहमीश्वरान्निजमहः सम्भारसंदीपि
तोदेहस्मिन्नरसिंहगुप्तघटितेलब्धास्पदः प्रोञ्छिमे श्रीमल्लक्ष्मण।
गुप्तदर्शितपथः श्रीप्रत्यभिज्ञाविधौटीकां प्रविमर्शिनीं रचयते।
वृत्तिप्रशिष्योगुरोः ॥ घटयतिपरिपाकंप्राक्वृत्तेप्रमाणे विघट
यतिचभूयोऽस्मत्सुसंज्ञामवित्ताम् अभिनवमतिरेवेश्वरप्रतिभि
ज्ञाविवृतिपदविमर्शिन्येवभोगापवर्गौ ॥ निजानुजमनोरथप्रार्थि
तमत्पथाभ्यर्थनावशोभिनवगुप्तसमस्पदनिवेशितस्वात्मकः प्र
काशयतिमार्गमेनमसुनाजनोप्युन्मनाप्रयातिशिवधामतत्पथि।
नयत्नसूनोदृशाः ॥ सूत्रव्याकरणावगाहनपुचिस्मनकेमूलेऽति
घनसत्ताकल्पलताविवेकजस्त्रमेरभ्यर्च्यमुरुदेवताम् पीयूषासवसा
रस्यंदामहासाहित्यसौहित्यभागिवश्राम्यामपरभीश्वराद्वयके
ल्याकान्नाम रवः सांप्रतम् अस्तमनन्तमनुत्तरमघोरषोडशा
कशाक्तिचक्रगतम् ॐ तन्नमपदनिर्भेदि प्रणमामिपरोज्ज्वान्तकेवदे ॥
इहयकएवश्रीमदस्मत्परमेष्ठिश्रीसोमानंदपादप्रसादसादितस
मोत्तः श्रीमानुत्पलाख्यः शास्त्रकारोविकस्वरस्वहृदयकमल
परिमलपविचित्रदिगन्तः सूत्रं वृत्तिं टीकां चईश्वरप्रत्यभिज्ञानसिद्ध
येकृतवान् तत्रसूत्रकारभूमिकावस्थितः कथंचिदित्यादिना।
महेश्वरं प्रतिप्रह्वः स्वात्मानेपरामर्शेत्तस्माकाण्डेनप्रः सुरीभाववन
वृत्तेरवश्यंभाविताप्रयत्नेनवृत्तिकारपदावस्थितः प्रवृत्तमतेराणा
मेश्वरप्रह्वतां स्वात्मनिसततवाहिनीमपिपरामर्शपसूत्रकारएवचे
तद्भूमिकापत्नेवर्तत इतिदर्शयितुंयदपिवृत्तौस्वसमानाधिकर।
णेनदंदर्शितंप्रत्यभिज्ञापयामिपरिनिष्ठ्यमित्यादिना अन्यथा
सूत्रकृदेवंकरोतीतिवक्तव्यंस्यात्तदर्शनेचप्रयोजनेवृत्तिकृतः
सूत्रार्थानवबोधसंभावनानिरासः तत्रचनिर्देशोपिनाप्यवैतत्प्रा
कमाश्रायः स्फुटीभवेदर्थव्याख्यानाय पर्यायदानमात्रेणात्कृप्त

प्र·ज्ञा·
१

क्रमम् यथा काव्यटीकाव्याख्यानप्रक्रियां विदितेऽर्थे यथा काश्चिन्नमेस्त्वार्थाः प्रवृत्त
य इत्यत्र भगवद्भक्तो व्याख्यायमानायां मम मनकेवनस्य स्वेव्यापारः इति टीकाकारो
व्याचख्यानोऽपि न भगवत एवाभिन्न इति प्रतीयते इति संभाव्येतापि नमस्कारान्त
रान्तराकरणात्केवलं सूत्रकारात्पूर्वकसमनन्तरं तत्त्वद्वृत्तिग्रन्थकरणात्मिका
प्रवृत्तिराचार्यस्यैकतां गमयत्यन्यथैवं भूतैकप्रवृत्तिनिर्वाहासंभवात् टीकाका
रपदमपि शयानस्तु शास्त्रकारोऽवश्यं प्रवृत्तेनैरेणायुज्यते तत्रच मूलश्लोकपादो न पू
र्वभावीन स्पष्टवतारणक्रमोऽवश्यं वक्तव्यः प्रवृत्त्यंतरे चावश्यंभाविनि परमेश्वरप्र
तिपन्नतापरामर्शः श्रुतस्वरूपानुसंधेयः यद्यप्यस्य प्रत्यभिज्ञातेश्वरशक्तिविजृं
भारूपसमस्तस्वपरात्मपरिनिष्ठितवेद्यवेदकप्रपंचस्योन्मिषितमात्रमपि न पर
मेश्वरभावापमतिरिक्तं किंमेश्वरशक्तिप्रत्यभिज्ञानरूपप्रमाणपरिचयेन
तथापि राज्ञोत्सवालंकारार्थिनः भट्टकामदेनोत्सवसंभोगन्यायेनावश्यम
मग्रतन्माथभूतस्वरूपपरामर्शः कर्तव्यम् प्रवृत्ते पारत्तरालपातिभविष्यत्प्रवृ
त्तिसाफल्यभावनाय एकग्रन्थकारकृतं तं स्वयमेवाव्याख्यास्यति ग्रन्थावाची
त्यादिना तत्राद्यं ग्रन्थकारटीकाकारपदप्रतिपन्नो वक्ष्यमाणशास्त्रमर्मगतमर्था
येन परश्रनिपादनाया मवश्यकर्तव्यमपि पूर्वंप्रदानतन्मनितिलेपसभट्टतिन्तृषकेवुक
पलालप्रायमवधीर्य तत्स्वरूपं परममुपादेयं परात्मस्तुत्यं नमस्कारं करोति ॥
स्वेच्छेत्यादिना ॥ स्वस्मादित्यात्मनः सकाशात्स्वात्मनि चिन्मात्मन्येव स्वेच्छयैवेच्छ
या वभासमाना अन्योन्यावहान्नेतमेदात्मनानिर्भासमानाः सेपादिता अशेषाः सु
द्धाशुद्धमिश्ररूपालोकाः प्रमातृप्रमेयात्मेषां वयात्राः प्राश्रयः परस्परं संबंधाः
कार्यकारणभावक्रियाकारकभावविचित्रादयस्तेषामात्मा पारमार्थिकः स्व
भावोयः सएव शिवः ॥ एकमपि चेदं पदशक्तिभेदात्तेना दावृत्ते वोध्यात्मापि
देवादियज्ञादिमंत्रार्थवदुक्तं तथ्यान्त्वीकरोत्येके निष्प्रयारोहयोगपद्यसिद्धये
चैवं प्रयुज्यते यदहचति स्वेच्छयेति यएवंभूतो भगवांस्तस्मै नम इति तद्विष
यं प्रह्वीभावं द्योतयति नमः शब्दः ॥ ननु स्वरूपावस्थितमशेषं वेद्यवेदक
प्रपंचं ततः स्वरूपाद्बहिर्भावेन निजयेच्छयाव बहिर्भावयत्रसो बहिर्भूता
नपि स्वात्मन्येवावभासयति तथावभास्यमानानामपि तेषां सएवात्मेति सर्व
मिदं विरुद्धमाभाति तथा हि समस्तेयं लोकयात्रा भुवत्येव चिदात्मनि
स्वरूपे विश्रान्तेति तदेव तावत्कथं प्रत्येयम् तदेव चैव चेच्छया यदि बहिरवभा
स्यते तदिदानीं तत्रैव स्वात्मन्यवभास्यत इति किमेतत् स्वात्मन्यविभेदने हि
यदवभासनेन तद्धि रूढं बहिरवभासनम् न हि यद्भासमानं तत्रैव भाति तत्रैवे
वतद्बहिर्भूतं युक्तम् यद्दस्वगृहान्तर्भूतं तत्तद्बहिर्भूतं तस्य किंचतथाभासमा
नानामप्येषां सएवाविशिवआत्मेति नितरामप्रतीतिकम् तथाभासमान
त्वे हि भेदावभासनेन तथाम् शिवात्मकत्वं तेषामेकात्मकत्वेन तद्विरुद्ध
तयाप्यम् तत्रानात्मनेऽस्यैकात्मानन्त्रयुगपदेवाभीभावाद्युक्तम् कः प्रतीया
त

स्वात्मनि च व्यवस्थितं वेद्यवेदकराशिं बहिरवभासयितुं किमर्थमस्येच्छोत्पद्यते
निष्कारणमेव वा तदेच्छोत्पादाभ्युपगमे सततमेव तथाभावः स्यान्न कदाचि
दितितत्सर्वमिदमसमञ्जसप्रायमित्याशंक्याह ॥ शाम्बदिति ॥ यत्तावदुक्तं
शिवात्मन्येव विश्वं विश्रान्तमिति कथमेतदिति तत्रोच्यते इह भावानामस
त्त्वमसत्त्वं वा व्यवतिष्ठमाने संविदि विश्रान्तिमन्तरेण नोपपद्यते संविदि विश्रा
न्ता हि भावाः प्रकाशमाना भवन्ति प्रकाशमानता चैषां संविदभेद एव प्र
काशरूपसंविद्यतः तत्प्रकाशादतिरिक्तत्वे च प्रकाशते चेत्युच्यमाने नी
लस्वरूपादतिरिक्तमथ च नीलमित्युच्यते तदमी संविदि विश्रान्ता भावाः तावद्धि
संविदनपिकल्पत्वमध्यापातम् न च संविदो भेद उपपद्यते प्रकाशैकरूपायां
हि संविदि संविदन्तरात्स्वरूपभेदकृते भेदव्यवहारे एकत्र चाप्रकाशरूपत्व
मुक्तं स्यादित्यसंविद्रूपत्वमापतेत् वेद्याश्चामी तत्स्वरूपैकात्म्यभाजस्त्वयं
भिद्यमानत्वे चेत्सहेरन् तत्स्वमहिम्ना संविदं भेदयेयुरपि तदेव पुनस्सतो
भेदमालम्बितुं समर्थाः अथ संवेदनवैतत्यवैषां भेदाः तस्य हि मन्योन्या
श्रयम् देशकालेष्वपि वेद्यराशिमपि शयानो वेद्यत्वादेव संवित्तादात्म्य
मभियाचन्तो कथं कामं तां संविदं भिन्नाम् वेद्यराशिर्हि समस्त एव प्रकाशाद
भिन्नो यत्प्रकाशते तत्प्रकाशादभिन्नं संवित्प्रकाशश्च न हि प्रकाशभिन्नस्या
प्रकाशमानस्य प्रकाशमानतायुक्ता विरोधादित्येव प्रकाशमानत्वे प्रका
शाभिन्नत्वाद्धि पत्तत्वात्स्वभावविरुद्धामप्रकाशमानतामश्नुवहास्य दामवा।
धार्थव्याहृतं प्रकाशाभिन्नत्वेन व्याप्तमिति व्याप्तिसिद्धौ स्वभावहेतुः संविद
स्तत्प्रकाशात्मसहमाना अन्यैनैव प्रतिबिम्बामलत्वाः तद्धेतुभेदवैदेश्या।
कालभेदोपि न संविदो भेदकः किंच वेद्योदेशकालप्रभृतयु पापयोन।
ज्ञानचित्स्वरूपाभिन्नभावं भेत्तुं न शक्ताः केवलं स्वरूपभेदो भवन्नेव तैः
परिनिष्ठीयते न च संविदि कथञ्चिदपि स्वरूपभेदः प्रकाशैकरूपत्वा
दित्युक्तम् तदमी प्रकाश एव तावद्विश्रान्ता भावाः प्रकाशश्च विम
र्शशून्यो न भवति ततश्च विमर्श एव भगवत इच्छा नित्येव रुद्रदेवैरुक्तं प्रमा
तृवर्गस्य स्वतः स्वनीलपीतादिप्रमेयसमूहं यच्चावभासयतीति तथावभा
समानमपि च संवित्स्ये प्रकाश एव विश्रामस्तस्य तस्यान तथात्वस्यैवाभ
कल्पत्वात् न च प्रकाशमात्रतामुज्झति प्रकाशादतिरिक्तस्यात्मा
त्रस्याप्यप्रकाशनप्रसंगात् तदेवं भूतेन निर्भासमानेन कथमपहूयता
मिति विरोधोप्यत्र कश्चित् यदि हि नीलमनुज्झितनीलप्रकाशाभा
वमेव नीलप्रकाशनया निर्भायान्नीलानीलयोरपि विरोधः अवेदुर्यम
हौधयेत् इह पुनर्नीलादयो नुज्झितनीलादिभावा एव प्रकाशमानाः स
न्तः प्रकाशाभेदमयाः तदिदमेव भगवतः स्वाक्षेयम् यत्संविदात्मक एव भ
वन्विचित्रप्रमातृप्रमेयात्मना संविद्रूपानपिकेनापि संविद्रूपाधिकतया

निर्भासमानवपुषा प्रकाशते च तथा विमृश्यति च अनपेक्षकस्याप्यपेक्षकस्येव भास
नेन स्वच्छभावश्चोक्तो दर्पणस्येव महिमाकारस्य हठमस्पृष्टघटकुम्भकारभेदे खल्व।
तावयवाऽवयविभावाधाराधेयभावकार्यकारणभावप्रभृतिभिश्च व्यवहारनिर्वे
र्भेनात्मानमपि स्वरूपानतिरेकेणातिरिक्तैरिव च यन्निर्भासते तदेवं स्वच्छत्वमुच्यते।
केवलमस्य तथा विमर्शाभावादसामर्थ्यम् जडत्वं परमेश्वरस्तु तथाभासमान
मात्मानं विमृशत्येव संविदो विमर्शपर्यन्तत्वात् यथोक्तम् सर्वदैव तथाभा
समाने स्यादिति तत्र सर्वदेति कदाचिदिति च यदि कालः कश्चिन्निर्माणानिर
पेक्षः स्वतन्त्रः स्यात्तदेवमनेन चोच्येतापि न चैवम् तथाह्यस्मिन्काले योन्ता
देनास्य शाश्वस्यार्थान्यः कश्चिद्दते तथाभासमानात्सूर्यपरिस्पंदितान्नदे तत्त्रु
क्तं स्यात् तत्सूर्यादिविस्पंदितमहभावेनैव कस्मान्नीलादिविश्वं न भासत इति
तदिदमपि किं न चोच्यते नीलमेव पीतं किं न भातीति तन्नैवं तन्नीलं भासितं
स्याद्येवमन्यथाभासनेनैव तत्सूर्यविस्पंदितं नावभातमेव स्यात्तस्मादेव।
मेलतनिर्भासितं हि प्रलयदिनमेवायतने दिनं स्यान्नायितने दिनम् तन्नाव
तत्रभयात्मनापि न चातिरिक्तेन वपुषा भाति परमेश्वर इति न किंचिदप्रा
प्रातीतिकम् संवेदनस्यैव हि स्वमसंकल्पप्रायनिर्माणादौ तन्नदंतथैव स्थिता
भावसमभावहि स्वमसंकल्पप्रायनिर्माणादौ तत्क्रियायामप्यनतिरे
कोऽस्त्विति प्रत्युतप्रतीतिवहिष्कृतपरिकल्पनमप्रातीतिकम् तेन शाश्व।
दिति कालपरिच्छेदासंभवोऽक्तेनेति स्वरूपानतिरेकः स्वच्छत्वनतिरिक्तैवे
व्यतिरिक्तताभाससंभवः स्वच्छंदेति विमर्शस्वातंत्र्ययोगो वृत्तिपदेनैषा
रूपाणां भगवतिप्रपञ्चितमतिशिवेतादात्म्यावभासन्तः शाश्वदिति का
लापरिच्छिन्ना प्रत्यात्मस्वरूपानन्यथाभावमनागप्यभजमाना स्वच्छा प्र
पिकनिर्भासनमिवसहमाना स्वच्छंदा पायन्तिक प्रतिष्ठास्थानविमर्शात्म
त्वनया न हि विमर्शस्थानानन्तरोपयाद्यौलक्षणपारतंत्र्यविमुक्ता वृत्तिर्वर्तते पञ्जा।
स्वरूपस्पन्दितमेवयस्यमपवापि वरूपसांसारिकमोहापहस्तनयोगादा
नन्दसारभोगापवर्गरूपपरापरश्रेयःपरमार्थेन तयाशिवः परमेश्वरः।
तस्मैनम इति शास्त्रकृता ऽन्तःकायानंतानत्यद्भुतामाविष्करोति प्र
कृताचोक्तरूपा भगवत्स्वरूपोत्कर्षदर्शनेनतदिच्छावशाविर्भावितशरी
रप्राणादिकल्पितप्रमातृभावनासंस्कारात्मकशेषवृत्तिसंभवेऽप्युत्थान
समयसंभाव्यमानस्य शरीरादिगतप्रमातृताभिमानोऽकेस्यापासनेन मा
याप्रमात्रभिमानातिरेकत्वाभावितसंविदात्मकस्वस्वरूपतयातन्मयता
त्मकः समावेशः नाहंयोशिवस्वरूपंप्रधानप्रमातृतयापिशयेत्स्कारोमि

प्र०
ज्ञा० वि०
वि०
२

मायाप्रमातृभावाभिमाननिरसनत्वनिपातत्वद्योतकमेवायंनमःशब्दः य[illegible]त्वत।
मःशब्दस्यस्वरूपपरत्वमभिधीयते तत्त्वमनोरमम् नमोभगवतेनमःशब्दस्वरूप
पेणोनकिंचित् गीतन्यायेनहि नमःशब्दःस्वयमेतोभगवतिपरितोषमाधत्तइ
तिशापपक्षेदेयोयमर्थः स्वाहादीनामपिहोमदेवीदीक्षाभिवृद्धिदेवतार्पणात
र्पणप्रभृतिर्योग्यपदार्थोनस्वरूपनिष्ठता चादिनिपातवत् स्वरूपपरत्वेनचप
